749



Title नलोदयम् सुबोधिनीटीकासहितम्

Author प्रज्ञाकरः

Extent ९० Age

Subject काव्यम् सम्पूर्णम्

नं० ७४-६-घ
नलोदयम् सुबोधिनी टीका सहितम् (काव्यम्)
पत्राणि ९० (नवतिः) संपूर्णम्
पत्राणि ९०

नं. ७४६

15 x 8 इन्च इंच

Kashmir State
Public Con...
I shall draw your
attention to the ...

नलोदयकाव्यंसटीकं प.१.५

श्लोक ॥

ॐ न: श्रीगणेशाय नः अथ नलोदयः ॥ हृदय सदा यादवतः पापाटव्या दुरासदायाः दवतः अरि
लो॰ समुदायाद् अवतस्त्रिजगत्मा गाः स्मरेण दायादवतः ॥१॥ संधिवर्जितः ॥ ॥
हृदय सदा यादवतः पापाटव्याः दुरासदायाः दवतः अरिसमुदायात् अवतः त्रिजगत्
१ मा गाः स्मरेण दायादवतः ॥१॥ ॥ टीका ॥ हृदयेति हे हृदय अन्तःकरण
यादवतः यादवात् पद्मनाभात् मिलत् त्वं मा गाः मा गच्छेः कथम्भूतात् पापाटव्याः
पापरणपाद् दुरासदायाः दुःखेन सोढुं शक्यायाः दवतः दवाग्नेः अरि समुदायाच्
छत्रुसमूहात् त्रिजगत् त्रैलोक्यं सदा अवतः पालयतो रक्षतो वा यद्वा कीदृशाद् यादव
तः दुःसोढाया पापाटवी तस्या दवाग्नेरिति रूपकं पुनः कीदृशात् अरिसमूहात्
त्रैलोक्यमवत इति पुनः कीदृशात् स्मरेण कामेन दायादवतः पुत्रवतः दायादौ सुतबा
न्धवावित्यमरः १॥ श्लोक ॥ योजनि नागोपीतमप्रचारयो वल्लवांगनागोपीतः
भूर्ये नागोपीतः कंसाद्यो द्विषमेव नागोपीतः ॥ यः अजनि ना गोपीतः चचार

यः वल्लवांगनागोपीनः भूः येन अगोपि हृतः कंसात् यः द्वेषं पव नागः अपिहृतः २॥
टी॰ ॥ यइति यः नापुरुषः गोपीनः यशोदानः अगोपीनो देवकीनोवाऽजनि जा
तः यः वल्लवा आभीरास्तेषाम् अङ्गनास्तासां गोभिर्नेत्रैः पीनः सन् सादरम् अवलो
कितः सन् चचार दिङ्नरचारिणीभूजले लब्धदृष्ट्या श्रियां पुंसि गोरित्यमरः येन
भूरगोपि अरक्षि यः कंसाद् द्वेषमेव हृतःप्राप्तः येन नोगोपि कालियः कुवलया
पीडोपिवा हृतः दूरीकृतः यद्वा हृतोऽस्मात् कंसाद् द्वेषमेव केवलं न अपितु आ
गोपि अपराधमपि हृतः प्राप्तः ॥२॥ श्लोक यदरिषु मन्नानस्थितयोयन्नुन्न
मुदलमन्नामानः । यत्र समन्नामानः सुभवभाजश्च पठितमन्नामानः ॥२॥
यदरिषु मन्नाः मानस्थितयः यत् नन्नं उदलमत् नाम अनः यत्र समन्नामानः सुः
भवभाजः च पठितमन्नामानः ३॥ टी॰ यदरीति यस्मादरिषु मानस्थितयोऽभि
मानावस्थानमित्यर्थः यद्वा मानश्चित्तसमुन्नतिः स्थितिर्मर्यादा मानश्च स्थितयश्चेति

न॰ द्वंद्वः सन्ना अव सन्ना जाता इत्यर्थः। नाम संभावनायां, अनः शकटं येन नुन्नं प्रेरितं
लो॰ मत् उदलमत् चचालेत्यर्थः। यत्र कृष्णे ससन्नामाः नमनं नामः संक्रामो नामक्रे-
२ ति। सन्नामः सन्नामेन सह वर्त्तमानाः ससन्नामाः कृतसम्पद्नतयः संसारिका
२ नसुः। कीदृशाः पठितसन्नामानः संति च तानि नामानि च पठितानि वारं वारं
गृहीतानि सन्नामानि गोविंदादीनि ये ते पठितसन्नामानः यद्वा यस्मिन् मा
लक्ष्मीः ससन्ना सन्निकटा। समीपे निकटासन्नसंनिकृष्टसनीडवदित्यमरः तेना
दूरदेशान्तरवर्त्तित्वविशिष्टा समीपस्थितेति यावत् आसन्न इति आङ् उपसर्गस
हितः। अयं निरुपसर्गः च पुनः पठितसन्नामानो भवभाजो नसुः ३॥

श्लो॰। समानिन्दानवनाशज्जनतालिकुलं यथैव दानवनाशम् विरदाद्दान
वनाशं जगद्यालभतेयतः सदानवनाशम्॥४

समनिन्दानवनाशं जनता अलिकुलं यथा एव दानवनाशं द्विरदात् दानवनाशं २

जगत् च लभते यतः सदा अनवनाशं ॥४ ॥
टी॰ समेति जनता जनसमूहः यतो राज्ञः शं कल्याणं लभते प्राप्नोति च पुनः जगत्
दानवानां दैत्यानां नाशं मृत्यु यतो लभते कीदृशी जनता समनिन्दानवना णुस्तुतौ
धातोर्ल्युटि नवनं स्तुतिः निन्दा च नवनं च निन्दानवने समे निन्दानवने यस्याः सा
जगत् कीदृशं सदा अनवनाशं अवनं रक्षणं तस्य आशा अवनाशा नविद्यते अवनाशा
यस्य तत् अनवनाशं यथा अलिकुलं कर्णाहतिसकाशात् दानवनाशं प्राप्नोति दान
वनं दानजलं तस्य आशानं आशास्ते प्रातराशं सायमाशश्च तद्वत् ४ कुलकं ॥
श्लो॰ ॥ अस्ति स राजा नीते यामाख्यो यो गतीः परा जानीते यस्य रराज अनीतेः रत्नानि
जनः कुले धराजानीते ॥ ५॥
अस्ति सः राजा नीतेः यामाख्यः यः गतीः पराः जानीते यस्य रराज अनीतेः रत्नानि
यः गतीः पराः जानी जनः कुले धराजानि इत ५ ॥ ॥ टी॰

न· अस्तीति स रामाख्यो राजास्तीत्यन्वयः रामोभिरामः सुन्दर इति यावत् आख्या नाम
लो· यस्य सः यः नीतेर्नयस्य परा उत्कृष्टा गतीः जानीते जानाति अनीतेः ईतिरहिततया हेतौ पञ्चमी यस्य कुले सति राज्यं कुर्वति सतीति शेषः जनः रराज सुखी बभूव यद्वा कीदृशस्य यस्य अनीतेः ईतिरहितस्य ईतयो अतिवृष्ट्यादयः कीदृशे कुले धराजानि भूम्युत्पन्नानि रत्नानि इति शेषः ॥५॥

श्लो· यः सेनानावारिप्रकरनदीः शरमयं धुनानावारि । अतरन्नानावारि
३ बसैने यद्भुवि वनञ्च नानावारि ॥६

यः सेनानावा अरिप्रकरनदीः शरमयं धुनानाः वारि अतरत् नान अवारि बसैनेः यद्भुवि वनं च नानावारि ॥६॥ टी·

य इति यः सेनानावा सैन्यनौकया अरिप्रकरनदीः शत्रुसमूहनदीः अतरत् तीर्णवान् कीदृशीर्नदीः शरमयं बाणमयं वारि धुनानाः कम्पयमानाः यद्भुवि ना पुरुषः बसैने २

ने अवारि इति काकुः अपि तु वारित एव च पुनर्यस्य वनं नानावारि नानागजबंधनयु
क्तम् वारी तु गजबंधनीत्यमरः ॥ ६॥

श्लो॰ अपि यो दायादाय त्वयप्रदोंहसि सतां यदा यदायः
करमादायादाय श्रियोब्धिरधिराजन्नसि गदायादायः ॥ ७॥

अपि यः दायादाय त्वयप्रदः अंहसि सतां यदायाः दायः करं आदायादाय श्रियः अब्धिः
अधिराजं असिगदायादाः यः ७॥ टी॰
अपीति यः अंहसि पापे जाते दायादाय पुत्रायापि त्वयप्रदः नाशकर्ता यदायाः यस्य आ
याधनागमनानि सतां दायः न्यायप्राप्तो भागः पुनश्च यः अधिराजं राजानमधिकृत्य
करं आदाय आदाय श्रियः अब्धिः कीदृशः असिगदायादाः असिश्च खड्गः गदा च अ
सिगदे यादांसि जलजंतवो यत्र सतथा ॥ ७॥ ॥ श्लो॰

अविहूराजादित्या हृताल्पमेदेवभूः सराजादित्या येनसराजादित्या त्रिदिवात्संयु
क्त शत्रुराजादित्या ॥ ८॥

ना॰ लो॰ ५ ५

अवीति येन भूस्त्रिदिवात् स्वर्गादल्पभेदैव कृता कीदृशीभूः अविदूरराजा अविदूरे नि
कटे अजौ विषाणहरौ यस्याः सा तया कीदृश्यात् त्रिदिवात् अदित्या देवमात्रा वि
शिष्टात् विशेषेण तृतीया पुनर्भूः कीदृशी सराजादित्या दितायच्छेदाय हिताः
दित्याः न दित्याः अदित्याः साधव इति यावत् राजसु क्षत्रियेषु अदित्याः राजादि
त्याः तेन सह वर्त्तमाना तया सत्क्षत्रियश्रेष्ठेत्यर्थः अथवा राजादित्यनामा नृपश्रे
ना तेन सह वर्त्तमाना यद्वा राज्ञां मध्ये आदित्या राजादित्यस्तेन युक्तेत्यर्थः पुनः की
दृशात् त्रिदिवात् सराजदित्यात् राजा चंद्रः राजा च आदित्यश्च राजादित्यौ ताभ्यां सह
वर्त्तमानात् येन कीदृशेनादित्या संयुक्तशत्रुराजादिति दीनमवखण्डनमिति याव
त् दो अवखण्डने तया संयुक्तः शत्रुराट् यस्य स तथा तेन सखण्डनशत्रुणेत्यर्थः ८॥

श्लो॰ खलसेनानावेद्यः स्वांहोब्धौ भुवि च यस्य नानावेद्यः
स्त्रिग्यजनानावेद्य प्रयतेस्य स्वकाव्यविरचनानावेद्य ॥ ९ ॥

खलसेनाः न अवेत् यः स्वांहोब्धौ भवि च यस्य नानाविधः स्निग्धजनान् आवेद्य प्रयते
अस्य सकाव्यविरचनावे अद्य ९।।९ टी॰
खलेति स्निग्धजनान् आवेद्य निवेद्य स्वांहोब्धौ स्वकीयं यदंहः पापं तदेव अब्धिस्त
त्र मज्जयत् काव्यं तस्य रचना सैव नौ नौका तस्यै यस्य रामाख्यस्य अद्य इदानीं प्रय
ते यत्नं कुर्वे यस्य कस्य यः खलसेना दुष्टसैन्यं न अवेत् न रक्षेत् पुनर्यस्य भवि सं
सारे नानाविधः नानाप्रकारिका यज्ञभूमिमरुपप्रदेशाः सन्ति ९ ।।

श्लो॰ अथ निजराज्यन्तेन प्राशासि नलेन शत्रुराज्यन्तेन येनराज्यन्तेन
श्रियादिशो यस्य विहृतिराज्यन्तेन ।। १० ।। अथ निजराज्यं तेन प्राशासि नलेन शत्रु
राज्यन्ते न येन अराज्यन्त इनाश्रिया दिशः यस्य विहृतिः आज्यन्तेन १० टी॰
अथेति तेन नलेन निजराज्यं प्राशासि शासितम् कीदृशेन शत्रुराज्यन्ते शत्रूणां रा
ज्याः शत्रुक्षयेण अन्तेन मृत्युना येन दिशः अराज्यन्त अशोभन्त कीदृशेन इनाश्रिया इनवत्

न॰ लो॰ ५

सूर्यवत् श्रीः शोभा यस्य स तथा तेन यस्य च आज्यन्ते आजि युद्धं तस्य अन्ते मध्ये
विहतिर्न सर्वत्र जयप्रवेत्यर्थः ११ ॥ श्लो॰

मूर्त्तिमारसमानां योऽदधदायुःसहस्रमारसमानाम
रुद्रकुमारसमानामजयद्द्विषतां पंक्तिमारसमानाम् ११

मूर्त्तिं मारसमानाम् यः अदधत् आयुः सहस्रं आर समानाम् रुद्रकुमार
समानाम् अजयत् द्विषतां पंक्तिं आरसमानाम् ११ टी॰
मूर्त्तिमिति यः समानां वर्षाणां सहस्रमायुः आर प्राप ऋगतौ प्रापणे धातोः परोक्षायां
आर किं कुर्वन् मारसमानां कामतुल्यां मूर्त्तिमाकारं दधत् धारयन् यश्च द्विषतां
शत्रूणां पंक्तिं श्रेणीमजयत् जितवान् कीदृशीं रुद्रकुमारसमानां रुद्रकुमारः का
र्त्तिकेयः तद्वत् समानां मानेनसह वर्त्तमानां पुनःकीदृशीं आरसमानां शङ्कायमानां ११ ॥
श्लो॰ साम्प्वनियामानयतः श्रेष्ठाविद्यास्तदाश्रयामानयतः

अधिकायामानयतः शत्रावपि यस्य धीर्दयामानयतः ॥ १२ ॥

साश्वनियामाः नयतः श्रेष्ठाः विद्याः तदाश्रयाः मानयतः अधिकाया मा नयतः शत्रौ
अपि यस्य धीः दयां आनयतः ॥ १२ ॥ टी॰
साश्वेति तदाश्रयात्तस्य नलस्याश्रया भरतपर्णप्रभृतयः यतो नलात् श्रेष्ठा नभव
न्तीत्यध्याहार्यम् कीदृशात् नियमान्नियामः अश्वनियामेन सह वर्त्तमानाः विद्याः
मानयतः ज्ञानतः नियामो नियमो यामश्चेत्यमरः यस्य मा लक्ष्मीः नयतः नीतितः अ
धिकाय अधिक आयो यस्याः सा कीदृशस्य शत्रावपि दयां आनयतः कुर्वतो धीः जिव्हा
सा रहितेति शेषः १२ ॥

श्लो॰ अहितानामायस्य त्राता यः शरणगामिनामायस्य
गतनामायस्य सुतः पिता वीरसेननामायस्य १३

अहितानां आयस्य त्राता यः शरणगामिनां आयस्य गतनानामायस्य सुतः पिता वी
रसेननामा यस्य ॥ १३ ॥ टी॰

न॰ लो॰ ६ 6

अह्नितेति यो नलः शरणागामिनां शरणागतानां आयस्योद्यमं कृत्वा त्राता रक्षिता
पुनः आयस्य धनागमस्य यस्य च वीरसेननामा पिताभूत् विख्यातः कीदृशस्य ग
ता नानामायाः यस्मात्सो आयस्येति यमकप्रयत्ने धातोः क्त्वायां ल्यपि १३ ॥

श्लो॰ भुव्यातनोदन्तेन द्विषतां स यशांसि शोभनोदन्तेन
नीतानोदन्तेन क्षितिमभजन्नह्नितदन्तिनोदन्तेन १४

भुवि अतनोत् अन्तेन द्विषतां सः यशांसि शोभनोदन्तेन नीताः नोदं तेन क्षितिं अभ
जन् अह्नितदन्तिनः दन्तेन १४ ॥ टी॰
भुवीति स नलः भुवि पृथिव्यां द्विषतां शत्रूणामन्तेन नाशेन यशांसि अतनोत्
विस्तारयामास पुनः नोदनं नोदः प्रेरणमिति यावत् येन नोदं नीता अह्नितद
न्तिनः शत्रुहस्तिनो दन्तेन क्षितिमभजन् मृता इत्यर्थः कीदृशेन शोभनोदन्तेन
शोभन उदन्तो वार्ता यस्मात्सो स तेन वार्ताप्रवृत्ति वृत्तान्त उदन्तः स्यादित्यमरः
नुद प्रेरणे इति धातोर्नोदः १४ ॥

६

श्लो॰ सचिवगिराऽगोपायन्नलः सपृथिवीं निरस्तराऽगोपायम् शत्रोराऽगोपायं नीत्वा नेमु महत्तराऽगोपायम् १५॥

सचिवगिरा अगोपायत् नलः सः पृथिवीं निरस्तराऽगोपायं शत्रोः आगोपायं नीत्वा नेमुः महत्तराः गोपाः यं १५॥ टी॰

सचिवेति स नलः निरस्ताराऽगोपायं यथा स्यात् तथा सचिव गिरा मंत्रिवाक्येन पृथिवीमगोपायत् अरक्षत् राजस्योपायो राजोपायः व्यसनमिति यावत् निरस्तो राजोपायो यस्यां क्रियायां तत् तादृशं महत्तराऽगोपा आगोपायं नीत्वा यं नेमु र्नमश्चक्रुरित्यर्थः गां पृथ्वीं पान्ति ते गोपा राजानः आगोपायं आगमोऽपरायस्यापायो नाशस्तं गोपाः कीदृशाः शत्रोर्मध्ये महत्तराः श्रेष्ठाः अगोपायदिति गुपू रक्षणे धातोः आगोपरायोमत्वेऽथयमरः दिर्न्नेत्रद्युणोभूज लङ्स्तायमरः नेमुरिति णमु प्रणतो धातोर्लिटि बहुवचनम् १५॥

श्लो॰ योऽदम्भीमान्यायादधिकोऽथरिपुर्यमेत्य भीमान्यायात् वैदर्भीमान्याया

न लो॰ त्रिजगति कन्या बभूव भीमान्यायात् ॥ १५ ॥

यः अदम्भी मानी आयात् अधिकः अथ रिपुः यं एत्य भीमान् यायात् वैदर्भी मान्या

७ या त्रिजगति कन्या बभूव भीमान्यायात् १५ टी॰

7 योऽदम्भीति भीमान्यायात् भीमभूपालात् वैदर्भी कन्या बभूव जाता अनन्तं आनः आनो

स्यास्तीत्यानी आनी जीवितवान् आयो यस्य निरन्तरं धनागमवानित्यर्थः राजेति यावत्

भीमश्चासावान्यायश्चेति भीमान्यायस्तस्मात् वैदर्भी कीदृशी या त्रिजगति मान्या

पूज्या सको भीमः योऽदम्भोऽदम्भरहितः पुनः कीदृशः आयात् धनहृद्धेर्हेतो

मानी अभिमानी अथ अधिको रिपुः शत्रुर्यमेत्य यन्निकटे आगत्य भीमान् भीतः

सन् यायात् अपलाय्य गच्छेत् भीतिभीः माध्वसमभयमित्यमरः भीमान्मतुप्

ययादिति या प्रापणे धातोः यत्र भीमान् न्यायादित्यत्र भीमादिति पं॰ ७

पञ्चमी कल्पयित्वा न्यायात् न्यायेन कन्या बभूवेति आचक्षते तत्र सन्धौ सति नका
रद्वित्वं तेन यमकत्वहानिरिति नचिन्त्यम् ॥ २६ ॥

श्लो महिततमारम्भाभिर्दमयन्ती सदृगुमारमारम्भाभिः दधती मारम्भा
भिर्ववृधे सोरुद्वये समारम्भाभिः ॥ २७ ॥

महितमारम्भाभिः दमयन्ती सदृक् उमारमारम्भाभिः दधती मारंभाभि ववृधे
सा उरुद्वये समा रम्भाभिः २७॥

महितेति दमयन्ती ववृधे वृद्धिं प्राप्ता युवति र्बभूवेत्यर्थः कीदृशी उमारमारम्भा
भिः सदृक् सदृशी उमा पार्वती रमा लक्ष्मीः रम्भा ऽप्सरोभेदस्ताभि रुमारमार
म्भाभिः कीदृशीभिः महिततमारम्भाभिः प्रकृष्टामहिता महिततमः पूजिततम
इतियावत् महिततम आरम्भोयासां तास्तादृशप्रस्ताभिः पुनः कीदृशी भाभिः कान्ति
भिर्मारं कन्दर्पं दधती धारयन्ती पुनः कीदृशीः उरुद्वये रम्भाभिः कदलीभिः
समा ॥ २७॥

न॰ लो॰ ८

श्लो॰ सारत्ननारीणां नलः श्रियामजनि निलयनं नारीणाम्
यस्यानन्नारीणां मरुभुवमापद्घटावनन्नारीणाम् ॥ १८ ॥

सा रत्नं नारीणां नलः श्रियां अजनि निलयनं नारीणां यस्य अनन्ता अरीणां मरु
भुवं आपत् घटा अवनं न आरीणां ॥ १८ ॥ टी॰
सेति सा दमयन्ती नारीणां मध्ये रत्नं श्रेष्ठमजनि जाता नलश्च नारीणां मनुष्य
सम्बंधिनीनां श्रियां कान्तीनां निलयनं गृहमजनि नरस्येयं नारी यस्य चारीणां घ
टा मरुभुवमापत् प्राप अवनं नापदिति पूर्वेणैवान्वयः मरुभुवं कथम्भूतां आ
रीणां शून्यां धिक्कृतां वा अरीणां घटा कीदृशी अनन्ता नविद्यते अन्तं यस्याः सा
अनन्ता अवरीणां धिक्कृतश्चेत्यमरः १८ ॥

श्लो॰ चकमे सा राजन्यश्रेष्ठन्तन्ना स तेजसा राजन्यः
आप्तविसारा जन्यश्रियोऽधितयया जिताः स सारा जन्यः

चकमे सा राजन्यश्रेष्ठं तं ना सः तेजसा राजन् यः आप्तविसाराः जन्यश्रियः अधित य ८

या जिताः ससाराः जन्याः १९ टी॰

चकमे इति सा दमयन्ती तं राजन्यश्रेष्ठं क्षत्रियोत्तमं चकमे कामितवती सच नल

स्तां चकमे इति पूर्वेणैवान्वयः तेजसा राजन् दीप्तिं कुर्वन् येन जन्यश्रियो युद्ध

लक्ष्म्यः अधिगतप्राप्ताः कीदृशी आत्तविसाराः विसरणं विसारः विस्तार इति यावत्

आत्तो गृहीतो विस्तारो याभिस्ताः यया दमयन्त्या जन्या बध्वो जिताः कीदृश्यः

ससाराः सौन्दर्यसहिताः सारः स्थिरांशे सौंदर्ये इति धरणिः युद्धमायोधनं जन्यम्

समाः स्नुषाजनीबध्व इति चामरः १९॥

श्लो॰ नार्तिं नोद्यानेन प्रभाविहीनेन शोभनोद्यानेन

स्मरजानोद्यानेन स्फुटमिति गतिमिह नलोननोद्यानेन २॰

न आर्त्तिः नोद्या न इन प्रभाविहीनेन शोभनोद्यानेन स्मरजाः न अयानेन स्फुटं इति

गतिं इह नलः अननोद्यानेन २॰॥ टी॰

न॰ लो॰ ६१ नास्तीति नलः इति हेतोरिह वने स्फुटं यथा स्यादेवं यानेनाश्वनगति गमनं अतनो
दकरोत् इति किं अनेन शोभनोद्यानेन संहरक्रीडावनेनाद्य इदानीं नोऽस्माकं स्मर
जा कामोत्पन्ना आर्त्तिः पीडा ननोदयति न अपि तनोद्यैव नाशनीयेत्यर्थः कीदृशेन
इनभाविहीनेन इनः सूर्यस्तस्य या प्रभा किरणास्तेन विहीनेन रहितेन २०॥

श्लो॰ सोहितहन्तापततः कांश्चिदपश्यत्पडिताय हन्तापततः
सस्नेहन्तापततस्तान्यदमी तेषामावहन्तापततः ॥ २१॥

सः अहितहन्ता पततः कांश्चित् अपश्यत् हिताय हन्त आपततः सस्नेहं ताप
ततः तान् यत् अमी तेषां आवहन्त आप ततः ॥२१॥
सोहितेति अहितानां शत्रूणां हन्ता नाशकः स नलः हन्त हर्षे कांश्चित् पततः
पक्षिणः अपश्यत् अद्राक्षीत् कीदृशान् पततः हिताय सुखदानाय आपततः
आगच्छतः कीदृशः सः तापततः तापेन ततो व्याप्तः कामज्वरपीडित इत्यर्थः
यत् यस्माद्धेतोरमी ६

हंसास्तोषं सन्तोषमावहन्त अकुर्वत ततो हेतोः सस्नेहं स्नेहपूर्वकं यथा स्यात् तथा सोयं नलस्तान् हंसानाप प्राप जग्राहेति यावत् २१ श्लो॰

तत्तरसासमानः सविहंगगणोब्रवीत् ससारसमानः गतहिंसारसमान स्तुद लभ्योनिष्क्रयः ससारसमानः ॥ २२

तं तरसा रसमानः सः विहंगगणः अब्रवीत् ससारसमानः गतोहंसारस मा नः तुद लभ्यः निष्क्रयः ससारसमानः २२॥ टी॰

तत्तरसेति रसमानः शाब्दायमानः ससारसमानः सारसैः पक्षिविशेषैः कृतो यो मा नोऽभिमानस्तेन सहितः सविहंगगणेन हंससमूहस्तरसा वेगेन तं नलमब्रवीदवदत् तदेवाह हे गतहिंसारस गतः हिंसाया रसः प्रीतिर्यस्य सः तत्संबुद्धिः नोस्मान् मा तुद मा पीडय त्वयास्माकं सारः सामर्थ्यादीहपादि वा तत्तुल्यः निष्क्रयो लभ्यः प्रा यः अस्मानतइतिशेषः २२॥ श्लो॰

त्वं दूषकेतवंश्च... धिको भेष्यास्तुमोत्तिकेतवंश्च... ता

ऊं

सोतेद्धेः त्वद्धः त्वासक्ता लल तत्सकाशकेत्वद्धः त्वा ॥२३॥

नः त्वं द्यूषके त्वद्धः त्वात् अधिकः भैम्याः सुमः अन्तिके न अद्धः त्वा सा ते अद्धेः न अद्धःतु

लो. आसक्ता लल तत्सकाशके त्वं गत्वा ॥ २३॥ टी०

१० त्वमिति हे अंग नल न पुनस्त्वं द्यूषके त्वं गतवान् द्यूषके तोः कामसंगं तस्य भाव

१० स्तस्मादधिको नलः कामप्रासीरेताप्यधिकः सुन्दर इति यावत् इति भैम्या अन्तिके

निकटे त्वां सुमः स्तोष्यामः साभेमीतेऽद्धेः क्रोडे न पुनः अंगत राजन् अगिगात्यर्थः

कथंभूता आसक्ता तत् सकाशके दमयन्तीनिकटे स्वार्थेकः गत्वा लल कीडां कुरु २३॥

श्लो० इतिहंसारामाया निकटं यामयहतेव सारामाया

जग्मुः सारामाया जगद्धआलीभिरभिससारामाया ॥ २४॥

इति हंसा रामायाः निकटं यामयहता इव सारामाया जग्मुः सारामायाः जगद्दुःच

आलीभिः अभिससार अमाया ॥ २४॥

इतीति हंसाः सारामाया आरामेन सह वर्तमाना सारामा तस्याः सारामायाः रमाया १०

भैम्या निकटं समीपं जग्मु ययुः पुनः इति वक्ष्यमाणमूचुः यामयेन दैत्यशिल्पिना
कृता माया उत्कृष्टा मायेव या आलीभिः सखीभिः अमा सह अभिससार गतिमकरोत्
अमा सह समीपे चेत्यमरः ॥ २४ ॥

श्लो॰ श्रीसंकाशासस्य त्वम्भैमि नलस्य शशिनिकाशास्यस्य
अरिलोकाशास्यस्य यदि भार्या स्याः कुमारिकाशास्यस्य ॥ २५

श्रीसंकाशा असि अस्य त्वं भैमि नलस्य शशिनिकाशास्यस्य अरिलोकाशास्यस्य यदि
भार्या स्याः कुमारिकाशास्यस्य ।२५॥ टी॰

श्रीति हे भैमि त्वं यद्यस्य नलस्य भार्या स्याः भवेस्तर्हि श्रीसंकाशासि लक्ष्मी तुल्यासि श्री
वत्संकाशते शोभत इति सा कीदृशास्य नलस्य शशिना निकाशं तुल्यमास्यं वदनं यस्य
सो तस्य एवमरिलोकानां या आशा वांछा तामस्यति नाशयतीति सः तस्य एवं कुमारिका
शास्यस्य कुमारिकाभिरपरिणीताभिः स्त्रीभिराशास्यस्य वांछितस्य २५॥

श्लो॰ इतिहंससेनेदितया गणेन भैम्या मुदा हंससेनोदितया नवभासेनोदितया स्मरेण
स पुनर्नलोकसेनादितया ॥ २६ ॥

नः हांसेन उदितया गणेन भैम्या मुदा रसे नोदितया न बभासे न उदितया स्मरेण सः पुनः
लौः नलोकमे अनोदितया ॥ २६
॥ इतीति इत्युक्तक्रमेण हांसेन गणेन हंससमूहेन उदितयोक्तया मुदा आनन्देन हेतुना रसे
॥ शृङ्गारे नोदितया प्रेरितया स्मरेण कामेन उदितया उदयम् प्राप्तया युवत्येति यावत् प
नादृश्यया भैम्या न बभासे इतिन अपि न बभासे पुनस्तया भैम्या सहंसगणेन नलोकमे
नलगृहाय अनोदि प्रेषितः ॥ २६
श्लो॰ ताबह्रुधावायसस्य अग्रणः पुनरस्य सन्निधावायसस्य।
तांच निधावायसस्य अनुवंस्तु नलनाय न विबुधावायसस्य ॥ २७
ताः बहुधा वायसस्य अग्रण्यः पुनः अस्य सन्निधौ आयसस्य तां च निधौ आयसस्य अनुवन् नलनाय
न विबुधा वा यस्य ॥ २७ ॥ टी॰
ता इति पुनस्ता वायसस्यः हंसाग्रण्यः वयस्याभ्यसिता णामिमाः वायसीः हंसपंक्तयोः स्य नलस्य
संनिधौ समीपे आयस्यागत्य तां भैमीं बहुधा नानाप्रकारेण अनुवन् अस्तुवन् तुष्टुवुरिति या
वत् किम्भूते संनिधौ आयसस्य पनागमस्य निधौ आकरे आश्रयेवा अस्य कस्य यस्य नलना
य विबुधा अपि देवा अपि न भवन्ति वा शाब्दो ऽ प्यर्थकः २७ ॥ ॥

श्लो॰ इति सविनामानितया जेह्रे भैम्यानलोपि नामानितया स्वास्यं नामानितयाक्षि-
क्षेप च विचिन्त्य तस्य नामानितया ॥ २८ ॥

इति सः विना मानितया जह्रे भैम्या नलः अपि नाम अनितया स्वास्यं नामानि तया क्षिक्षेप
च विचिन्त्य तस्य न अमानितया ॥ २८ ॥

इतीति इत्यनेन प्रकारेण विना हंसेन मानितया पूजितया हृतः स्तुत्येति यावत् नाम सम्भा-
वनायां स्वास्यं स्वमुखमनितयाऽप्राप्तया तया भैम्या धीरोपि नलः जह्रे हृतः वशीकृत इति
यावत् पुनस्तस्य नलस्य नामानि विचिन्त्य नलनैषधेत्यादि चिंतयित्वा क्षिक्षेप स्वं कीदृक्
नलः अमानितया न उपलक्षितः मानिनो भावो मानिता तस्या अभावोऽमानिता तया न उपल-
क्षितः अभिमानयुक्त इति भावः २८ ॥

श्लो॰ । अथ समसमुद्रागस्य त्यागान्तस्यालंकृतेः समुद्रागस्य
यौवनमुद्रागस्य स्वस्तुतारत्नस्य सादमुद्रागस्य ॥ २९

अथ समसमुद्रागस्य त्यागान्तस्य अलंकृतेः समुद्रागस्य यौवनसमुद्रागस्य स्वस्तुतारत्नस्य सादं उ-
द्रागस्य ॥ २९ ॥

न
लो॰
टी॰
१२
12

अथेति अथानन्तरं समुद्रस्य अरागस्य समुद्ररागो नाम्ना सहितस्य दमानस्य पृथ्वीपर्यन्तस्थलं
क्ते रलंकारभूतस्य समुद्ररागस्य मुदमानन्दं राति ददातीति मुद्रः मुद्रश्चासावरागश्च सः तेन
सह वर्तते इति तादृशस्य यद्वा राजा कीदृशः समन्त् सहर्षः द्राक् द्रुतिति अस्य स्तारत्त
स्यत्यर्थः यद्वा मुद्राश्चासौ रागोऽनुरागः सचमुद्ररागो नाम्ना सहितस्य एवं येनमुद्रा स्तनेन्द्रेकादि
चिह्नं तद्रूस्य प्राप्तस्य एवं उद्ररागस्य उत् उद्गतो रागोऽनंगरागः पीडा वा यस्य तस्य रागोम
त्सरे लोहितादिषु क्लेशदाववनुरागे च गान्धारादाविति मेदिनी स्वस्तारत्तस्य सादं अवसादं का
मजदुःखं ॥ २९ ॥ दृष्ट्वा राजानतुत स्वयंवरं विधिवदिन्दिराजानतुतः यस्यराजानतुतः
पृथगवथासौ जनाद्द्राजानतुतः ॥ ३० ॥
दृष्ट्वाराजा अनतुत स्वयंवरं विधिवत् इन्दिराजानतुतः
यस्य जराजा ननुतः पृथक् अथा असौ जनात् रराज अनुतः ॥ ३० ॥ टी॰
दृष्ट्वेति द्वितीयेनान्वयः असौ राजा भीमः स्वयंवरं विधिवत् अनतुताकरोत् यो राजा अतनु
तः महतो जनात् मनुष्यात् रराज शुशुभे यस्य ननुता देहात् जराजा जरोत्पन्ना अथा १२

पृथक् भिन्ना बहुमध्ये सुन्दरो युवा चेति भावः कीदृशो राजा इन्दिराजातनुतः इन्दिरा
लक्ष्मी तस्याः सकाशाज्जातो यः कामस्तेन नुतः स्तुतः कामाधिकसुन्दर इति यावत् ॥ १ ॥
श्लो॰ तं हासेनापालिः स्वयंवरं क्षितिभुजां ससेनापालिः न बभासेनापालिः स्रगेषु यैः
शिरसि यारसेनापालि ॥ २ ॥ तं हासेन आप आलिः स्वयंवरं क्षितिभुजां ससेनापालिः न
बभासे नापालिः स्रक् एषु यैः शिरसि यारसेन अपालि ॥ २ ॥
तमिति क्षितिभुजां राज्ञामालिः पंक्तिः हासेन हर्षादिना तं दमयन्त्याः स्वयंवरमाप प्राप
यद्वा कीदृशी आलिः हासेन उपलक्षिते उपलक्षणात्तृतीया कीदृशी आलिः ससेनापालिः
सेनापालयः सेनान्यस्तद्युक्ता सा स्रक् माला एषु राजसु न बभासे इति काकुः अपि तु शुशु
भे इत्यर्थः सा का या स्रक् माला तैः राजभिः शिरसि रसेन स्नेहेन अपालि अरक्षितेत्यर्थः
किम्भूता स्रक् नापालिः अपगता अलयो यस्याः सा अपालिः न अपालिः सभ्रमरेत्यर्थः तेषां
शिरःसु इन्द्रनीलादिमत्तया भृङ्गाभावेऽपि भृङ्गवत्तया माला शोभते स्मेति ध्वनिः ॥ २ ॥

न॰ लो॰ टी॰ १३ 13

तां गां सेनाराजिः स्वर्गसद्भ्यो यैः सदा रसेनाराजि आयामेन राजिज्जयितरिपौ चलति
विबुधसेनाराजि ॥ ३२ ॥ तां गां सेनाराजिः स्वर्गसद्भ्यो यैः सदा रसेन अराजि आया
मेन आर अजिज्जयितरिपौ चलति विबुधसेनाराजि ॥ ३२ ॥
तामिति आजिज्जयितरिपौ आजौ संग्रामे जयिता नाशिता रिपवः शत्रवो येन सः त
स्मिन् विबुधसेनाराजि विबुधा देवा तेषां या सेना तस्या राट्सः तस्मिन् इन्द्रे चलति सति
स्वर्गसदां देवानां सेनाराजिः सेनापंक्तिः आयामेन श्रेणा तां गां विदर्भदेशोपलक्षितां
भुवं आर आपयैः स्वर्गसद्भिः सदा सर्वदा रागेण सेम्यनुरागेण अराजि शोभितम् ३२

श्लो॰ सोथ परमहंसेन प्रापि नलेनोत्सवः परमहस्तेनः स्फुरितपरम
हस्तेन प्रबभो रविणेव तत्पुरं परमहस्तेन ॥ ३३ ॥

सः अथ परमहस्ते प्रापि नलेन उत्सवः परमहस्तेनः स्फुरितपरमहस्तेन प्रबभौ रवि
णा इव तत्पुरं परं अहः तेन ३३ ॥ सोथेति अथानन्तरं परमहस्तेन परम उत्कृष्टो ह
स्तः करो यस्य सः तेन आजानुलम्बितभुजेनेत्यर्थः स स्वयंवरः प्रापि प्राप्तः कथम्भू १३

प

तः स्वयंवरः परमहस्तेनः पेरषां महाः परमहा स्तेषां स्तेनस्तत्स्कारः महउत्सवः प्रमुत्कृ
ष्टं तत्पुरं भीमनगरं तेन नलेन प्रबभौ शुशुभेकेन किमिव स्फुरितपरमहस्तेन स्फुरितपर
महस्ते स्फुरिता परमा उत्कृष्टा हस्ताः किरणाः यस्यतेन रविणा अहः दिनमिव ३३॥

श्लो॰ द्विष्मलसन्नालोकानहितेषु मुखेन्दुत्तलितसन्नालीकान् राज्ञःसन्नालोकान्
कान्निर्विबुधांश्चनाहसन्नालीकान् ॥३४ द्विष्मलसन्नालीकान् अहितेषु मुखेंदुत्तलितसन्ना
लीकान् राज्ञः सन्नालोकान् कान्तिःविबुधान् च न अहसत् नालीकान् ॥ ३४॥ टी॰
द्विष्मेति नाली नलस्येयं नाली कान्तिः कान् राज्ञो नृपान् च पुनः कान् विबुधान्नाहसद्पित
सर्वानेव कीदृशान् अहितेषु शत्रुषु द्विष्मलसन्नालीकान् द्विष्माः प्रेरिताः लसन्तो दीप्यमाना
नालीका बाणाविशेषा यैस्तान् एवंमुखेंदु त्तलितसन्नालीकान् मुखेंदुभिस्तुलितानि सन्ति सभी
चीनानि नालीकानि पद्मानि यैस्तान् एवं सन्नालीकान् सन्नमपगतमलीकं कपटादि येषांतेतान्
एतान् लटविसरणगत्या: न्नः ॥३४॥ अजनिकलापास्पतंस्वयशोः निजकंमहः कलापास्पतं ॥
श्लो॰

= अजति कला पास्यन्तं स्वयशः अनिजकं महः

= कला अपास्यन्तं शत्रुकलापास्यंतं प्रेक्ष्य नलं

स्वरततिः कलापास्य तं ३५

न॰ लो॰ टी॰ १४

14

शत्रुकलापास्यन्तं प्रेक्ष्य नलं स्वरततिः कलापास्यंतं ।३५।

अजनीति स्वरतति र्देवपंक्ति स्तं नलं प्रेक्ष्य दृष्ट्वा कला जज्ञे किं कर्त्तव्यता मूढा जातेत्यर्थः कीदृशं नलम् स्वीयं यशः पास्यन्तं रक्षन्तम् अनिजकमस्वकीयं महस्तेजः प्रभुत्वमपास्यन्तमरक्षन्तम् यद्वा निजकं स्वकीयं महस्तेजः आपास्यन्तं दूरतः प्रसारयन्तमित्यर्थः एवं शत्रुकलापास्यन्तं शत्रूणां कलापाः समूहा स्तानस्यति क्षिपतीति सः तम् अथवा अस्यन्तः असिना अन्तो यस्य एतादृशः शत्रुकलापो यस्य एवं कलापास्यं कलां पातीति कलापः अन्द्रस्तं तु सदृशमुखम् कलापो भूषणो बर्हे तूणीरे संहतेपि च इत्यमरः ३५॥

श्लो॰ स्वर्निलयानामनलंकृतमपिजेतुन्ततिःश्रियानामनलं यमजेयानामनलम्प्रोचे शक्रस्तामरिचयानामनलम् ॥ ३६॥

स्वर्निलयानां अनलंकृते अपि जेतुं ततिः श्रिया नाम नलं यं अजेयानां अलम् प्रोचे शक्रः तं अरिचयानां अनलं ॥३६॥ स्वरिति शक्र इन्द्रस्तं नलं प्रोचे उवाच नाम सम्भावनायां तं कं यमनलंकृतमप्यलंकाररहितमपि नलं स्वर्निलयानां देवानां ततिः श्रेणिःश्रिया १४

घोभया ज्ञेतं तिरस्कर्त्तुमनलं न अलं समर्थो किम्भूतं नलं अजेयानामन्यैर्जेतुमश
क्यानामरिचयानां शत्रुसूयानामनलमग्निं दाहकत्वात् २६

श्लो॰ वद कामायामन्नस्त्वम्भैमी यद्गुणाः श्रमायामन्नः श्रेष्ठतमायामन्नस्त्वा
न्द्रष्टा नन्नु जनः स्वमायामन्नः ।३०। वद कामायामं नः तं भैमी यद्गुणाः श्रमाय
आमन् नः श्रेष्ठतमा या आमन्नः त्वां द्रष्टा न नु जनः स्वमाययामन्नः ३० ॥
वदेति हे नल त्वं तस्यै भैम्यै नोऽस्माकं कामायामं कामेन कृताय आयामस्तं वद
त्वत्कृते देवान् कामः पीडयतीति भावः तस्यै कस्यै यद्गुणाः यस्याः गुणा नोऽस्मा
कं श्रमाय खेदाय आमन् अभूवन् घासयेति पाठे घास्त्रौ अयमर्थः अन्य च या श्रेष्ठतमा
अत्यन्तमुत्कृष्टा पुनस्तत्रैत्यर्थात् आमन्नौ जनो द्वारपालकादिस्त्वां न द्रष्टा न द्रक्ष्यति
कीदृशस्त्वम् स्वमायामन्नः स्वस्य तव मत्प्रसादजन्या या माया कपटः तयामन्न आ
च्छन्नः ।३०

इति नरवैकेहास्त्यत्यस्य समुकृते नरप्रवेकेहास्त ॥

न॰ लो॰ टी॰ १५

तामविवेकेहास्तः अयति स्त्रीतत्र पार्थिवेकेहास्त ३८ ॥

इति सरवे के हास्तं त्यस्य सः मुकुलं सरप्रवेके अहास्त तां अविवेकेहास्तः अयति स्त्री तत्र पार्थिवे का इह आस्त ।३८ इतीति सरप्रवेके सरश्रेष्ठे इन्द्रे इति उक्तप्रकारेण सरवे सश्रीहे सति इंद्रे एवमुक्तवति सतीत्यर्थः के मस्तके हास्तं हस्तसम्बंधि मुकुलं त्यस्य मस्तके अञ्जलिं कृत्वा स नलः तां दमयंती अहास्त जगाम कीदृशः सः अविवेकेहास्तः अविवेकस्याज्ञानविशेषस्य या ईहा चेष्टा तया अस्तः रहितः यद्वा नलं दृष्टवती दमयन्ती नान्यं वरिष्यतीति इन्द्रस्य योऽविवेक स्तज्जनितया चेष्टया अस्तः प्रेषित इत्यर्थः पार्थिवे नले अयति गतवति सति का स्त्री इह स्थले आस्त अतिष्ठत् न कापीत्यर्थः ॥ ३८ ॥ हरिपवमानयमानान्नतोऽस्मिनलोमहारमानयमानान् ।

भवतीमानयमानान्भेमिस्मरणान्विद्धिमहमिमानयमानान् ३९

हरिपवमानयमानां नतः अस्मि नलः महारमानयमानान् भवंती मानयमानान् भैमि स्मरणान् विद्धि महं इमान् अयमानान् ३९ ॥ ॥ ३९ ॥ ॥३९॥ १५

हरीति हरिरिन्द्रो ऽग्निश्च पवमानो वरुणो वायुश्च यमः कृतान्तस्तेषां इतो नल
नामाहमस्मि इमानिन्द्रादीन् सुरान् महत्तव स्वयंवरमयमानान् प्राप्तान् विद्धि जा
नीहि कीदृशान् महारमानयमानान् रमा लक्ष्मीः नयो नीतिः मानश्चित्तसमुन्नतिः
महान्तो रमानयमाना येषां ते तान् एवं भवती त्वां मानयमानान् स्वीकुर्वतः ३६ ॥

त्वल्पेप्सरसादेहिप्रभवो मग्नाः स्मर प्रसरसादेहि तानभिसरसादेहि
स्रजञ्च नाकात्सुखञ्च सरसादेहि । ४ ।

त्वल्पे अप्सरसा देहिप्रभवः मग्नाः स्मरप्रसरसादेहि तान् अभिसर सा देहि स्रजं
च नाकात् सुखं च सरसात् एहि । ४ ।
४६ त्वल्प इति हे अप्सरसा तुल्ये रमादिसदृशे देहिप्रभवो मनुष्यादीनामीश्वरा । देवाः
पु॰ स्मरप्रसरसादे स्मरस्य यः प्रसरः प्रसारस्तज्जन्ये सादे दुःखे मग्नाः हि यतः अतः सा
श्री॰ त्वं तान् देवानभिसर स्वीकुरु पुनः स्रजं मालां देहि सरसादमृतादियुक्तान् स्वर्गात्
पु॰ सुखमेहि प्राप्नुहि ॥४॥ इति कृतसामारवतः सुरलोकान्तमुखेन समारवतः ॥
श्लो॰

न॰ लो॰ टी॰ १६
16

नरिंसामामारवतः स्थलादिव नलोत्कमानसामामारवतः ४१॥
इति कृतसामामारवतः स्वर्लोकात् तन्मुखेन सा मारवतः न रिंसां आर वत स्थ
लात् इव नलोत्कमानसा मारवतः । ४१। टी॰
इतीति सा भैमी स्वर्लोकादिन्द्रादिदेवगणात् रिंसां रन्तुमिच्छां क्रीडां न आर
न प्राप किम्भूतात् तन्मुखेन नलमुखेन इति पूर्वोक्तन्यायेन कृतसामारवतः
कृतः सामस्य सान्त्वनायाः आरवः शब्दो येन ततः एवं मारवतः मारो मदनस्त
द्वतः वत खेदे कीदृशी सा नलोत्कमानसा नले उत्कमुत्कण्ठितं मानसं चेतो
यस्याः सा कस्मादिव मारवतः स्थलादिव मरीचिं मारवं तादृशात् स्थलादिव
मरुसंबंधिदेशादिव यथा हंसः नलोत्कमानसः नले जलोत्पन्नपदार्थविसे ।
उत्कण्ठितचित्तो मरुसम्भूतवस्तुतो रिंसां नाप्नोति यद्वा कृतसामेति दमयन्त्या वि
शेषणं कृतं साम सान्त्वं यया सा आरवतः शब्दं कुर्वत इति स्वर्लोकविशेषणम्
॥४१॥

श्लो॰ साविरराज्ञायतनया वीक्ष्य दृशा तं स्मरातुराजायतनया। स्थितिरज्ञाजायतनया
द्युसदान्नाभाषिनिषधराजायतनया ॥ ५२ ॥
सा विरराज आयतनया वीक्ष्य दृशा तं स्मरातुरा अजायत याऽस्थिति: अत्र अजायययाद्यु
सदां च अभाषि निषधराजाय तया ॥ ५२ टी॰
सेति सा भैमी विरराज विशेषेण शुशुभे सा का या आयतनया विशालया दृशा दृष्ट्या
अत्र भवेन तं नलं वीक्ष्य दृष्ट्वा स्मरातुराकामव्याप्ता अजायत अभूत् अपरं तया भैम्या
निषधराजाय नलाय द्युसदां दिवि सीदन्तीति द्युसदो देवास्तेषां स्थिति: स्थानं अजाय
तयाज्ञायायाः भावो जायता नजायता अजायता तया अभाषि अवादि स्त्रीत्वेन देवान्
न वृतवतीति भाव: ॥ ५२ ॥
श्लो॰ तस्या देवाघस्य प्रणाम्य च नलेन धी: पदेवाघस्य।
सति निनदेवाघस्य स्वयंप्रियायाः पदंमुदेवाघस्य। ५३ ॥
तस्याः देवाघस्य प्रणाम्य च नलेन धी: पदे अवादि अस्य सति निनदे वाघस्य स्वयं प्रियायाः
पदं मुदे अवात् यस्य ॥ ५३ ॥

नः लोः टीः ७
17

तस्याइति नलेनास्य देवाद्यस्य सरसुधायमेयेन्द्रस्य पदे चरणे प्रणम्य अभिवाद्य तस्याः भैम्याः धी बुद्धिरवादि उक्ता कस्मिन् सति वाद्यस्य तूर्य्यादेर्निनदे शब्दे सति यस्य नलस्य मदे ग्रानन्दाय प्रियायाः पदं वाक्यं अवात् प्राप यद्वा अस्य कस्य यद्येन्द्रस्य मुदे हर्षाय प्रियायाः पदं स्थानमवात् जगाम नल इति शेषः भैमी तां न हृणीत इत्युक्तवानिति भावः ॥ ५३॥

श्लोः अथयनरमारंगेयन्नृपतिगणोऽस्थितपदेषु सारङ्गेयं चञ्चलसारेङ्गं यन्दमयन्ती चाचितवलितसारङ्गेयं ॥ ५४ ॥ ॥ अथ नरमा रंगे अयं नृपतिगणः अस्थित पदेषु सारं गेयं चञ्चलसारेङ्गं अयन् दमयन्ती च अञ्चितवलितसारङ्गा इयं ॥ ५४॥ अथेति अथा नन्तरमयं नृपतिगणो राजलोको रंगे स्वयंवरसभायां तरमा वेगेन पदेषु भीमकल्पितमञ्चस्थानेषु अस्थित आसीत् नृपति गणः पदान्यञ्चत इति पाठे पदानि चरणविन्यासम् अञ्चत प्रकरोदित्यर्थः किं कुर्वन् सारम् उत्कृष्टं गेयं अयन् गीतं शृण्वन्निति भावः गत्यर्था ज्ञानार्थाः कीदृशे रंगे चञ्चलसारंगे सौरभ्याधिक्येन चञ्चलाः सारङ्गा भ्रमरा यत्र तादृशे यद्वा चञ्चलसारेङ्गं खेलन्मृगविशेषे इत्यर्थः य॰

७

यद्वा चञ्चला गमनागमनशीलाः सारङ्गा गजा यस्मिन् तस्मिन्नित्यर्थः पुनरियं दमयन्ती स्वोचितपदेषु अस्थित इति पूर्वेणान्वयः कीदृशीयं अतितरलितसारं गा अतिभां तरलितः सारंगो मृगो यया सा सारङ्गश्चातके भृङ्गे कुरंगे च मतंगजे इत्यमरः ॥ ४४॥

वपुःश्रवनामास्यपेषु प्रजा नृपेषु अथ निवेद्य नामान्येषु ।
सूतैर्नामान्येषु प्रकीर्त्यमानेषु शोभनामान्येषु ॥ ४५॥

वपुःश्रवनामान् येषु प्रजाः नृपेषु अथ निवेद्य नामानि एषु सूतैः नाम अन्येषु प्रकीर्त्यमानेषु शोभना मान्येषु ॥ ४५॥

वपुरिति अथ एषु नृपेषु राजस्य नामानि निवेद्य उक्त्वा सूतै मागधैः प्रकीर्त्यमानेषु स्तूयमानेषु वंदिभिः कृतपरिचयेषु सत्सु तथा नाम सम्भावनायां अन्येषु मान्येषु देवेषु प्रकीर्त्यमानेषु सत्सु एषु केषु येषु नृपेषु प्रजास्तत्रत्या जना श्रवनामान् नमस्कारान् वपुश्चक्रुः ॥४५॥ श्लो॰

सांगेननलसमानानलसमानानमुत्रकतिचित्पुरुषान् ।

साङ्गेन नलसमानान् अनलसमानान् अमुत्र कतिचित् पुरुषान् ।

नै॰ ली॰ टी॰ १८

18

प्रैक्षत न नलसमानान् अनलसमानान् अभूत न तेषांभेदः ५६।

प्रैक्षत नलसमानाननलसमानानभून्न नेषामभेदः ॥ ५६ ॥ सागाइति सा
शोभना भद्रा भैमी अमुत्र स्वयंवरे कांश्चित्पुरुषान् न प्रैक्षत इति न किन्तु ददर्श
कीदृशान् अनलसमानान् अग्नितुल्यान् एवं नलसमानान् देदीप्यमानान् एवं अन
लसमानान् न अलसमाना अनलसमानास्तान् अंगेन शरीरेण नलसमानान्
नलेन सदृशान् यतस्तेषां नलसमानानां पुरुषाणामिन्द्रादीनां भेदो विविच्य
ज्ञानं नाभून्न जातम् ॥ ५६ ॥ श्लो॰ ॥ रुचिरुन्नतनामसत्यागाः स्फुरतु नलो यदि
च वच्मि नामसत्यागाः अपि दीनामसत्यागान्न्याययुतेनैव वर्त्मनामसत्यागा ॥
॥ रुचिरुन्नतनामसत्यागाः स्फुरतु नलः यदि च वच्मि न असत्याः गाः अपि दीना सती
अगां न्याययुतेन एव वर्त्मना सत्यागा ॥ ५७ ॥ रुचीति परं यद्यहं सती सा
ध्वी यद्यहं असत्याः गाः वाणीः न वच्मि न वदामि तथा दीनापि यदि न्याययुतेनै
व वर्त्मना धर्ममार्गेणैव अगां गच्छामि यद्यहं सत्यागा त्यागेन दानेन सहवर्त्तमा
ना तदा नलः स्फुरतु इन्द्रादिभिन्नत्वेन ज्ञानविषयो भवतु कीदृशो नलः रुचिरुन्नतना

१८

15

सत्यागाः स्वच्छा कान्त्याह्लातः नासत्ययो र्दस्रयोः अगो ऽपराधो येन दस्राधिकसुन्दर इति
यावत् ॥४७॥ श्लो॰ ॥ यदि वा भावन्नाय स्थितास्मि नल एव नरति भावनस्य देवसभा
वनस्य द्विपस्य वपुषो भवेद्विभाविनस्य ॥ ४८ ॥ यदि वा भावं नस्य स्थिता अ
स्मि नले एव नरविभो अनस्य देवसभावनस्य द्विपस्य वपुषः भवेत् विभा अवनी अस्य
४८॥ टी॰॥ यदिवेति वा समुच्चये यदि चेत् अनस्यानास्मिन् पुरुषभावं चिन्ताभिः प्रायं
तस्य त्यक्त्वा निपूर्वस्याहमेव तपणा इत्यस्य त्वयेति रूपम् अहं नल एव स्थितास्मि तिष्ठामि वर्त्ते
तर्हि अस्य नलस्य वपुषः शरीरस्य विभाकान्तिः अवनी रक्तिका भवेद् भवतु कीदृशे न
ले नरविभो नराणां विभुर्नरविभुस्तस्मिन् कीदृशस्य वपुषः देवसभोनस्य द्विपस्य देवा
नां सभैव वनं तत्रोत्पन्नस्य द्विपस्य हस्तिनः अन्योपि द्विपो वन्यो भवति ॥ ४८ ॥
कृतनभावा सा वनितानिति भुवमेतत् सुरान्त्वा सा वनिता स्वपतिं वा सा वनिताचिह्नं
धार्मिकजने भुवा सा वनिता ॥४९॥ कृतभावा असौ अनितान् इति भुवं पेतत् सुरान्
सवासाः वनिता स्वपतिं वा सा वनिताचिह्नं धार्मिजने भुवा आम अवनिता ॥४९

न। लो। टी। १९
19

कृतेति असौ वनिता भैमी भुवं भूमिमनितान् अप्राप्तान् भूमिस्पर्शरहितान् सुरान्
देवान् पेक्षत अपश्यत् कथंभूता सा इत्यनेन प्रकारेण कृतभावा कृता भावक्रियाभिप्रा
यो यया सा एवं सुवासाः सुष्टु शोभनं वासो वस्त्रं यस्याः सा वा शब्दश्चार्थः च पुनः स्वपतिं
नलं पेक्षत कीदृशं स्वपतिं अवन्या सह वर्तमानः सावनिः तस्य भावः सावनिता सैव
चिह्नं यस्य तं भूमियुक्तपादत्वात् देवभिन्नत्वेन अपश्यदित्यर्थः देवानान्तु तद्राहित्य
स्वाभाविकं तं कम् यस्य नलस्य अवनिता अवनं रक्षणमस्यास्तीत्यवनी अवनिनो भावो
ऽवनिता रक्षणवत्ता धार्मिकजनेन साधुरिति जनैर्युवा तिष्ठिता आस भवति स्म आसेति व
भूतार्थेऽव्ययम् ॥ ४४ ॥ ॥ स्वरिरंसोदि वाल्याकुलया दृष्टार्थितापि सा देवाल्या ।
वपुषि समादेवाल्या दृष्ट नलमुपस्थितं रसादेवाल्या ।५। स्वरिरंसादा इव अल्या
कुलया दृष्टा अर्थितापि सा देवाल्या वपुषि समादे वाल्यात् अदृष्ट नलं उपस्थितं रसादेवा
ल्या ॥ ५ ॥ स्वेति सा भैमी आल्या सख्या कारणेन रसादेव प्रीतेरेव तं न लदृष्ट अदृष्टएत की
दृशं नलं उपस्थितं समीपे तिष्ठन्तम् कस्मिन् सति वाल्यात् वाल्यमारभ्य वाला नवयौवना
तस्याभावो वाल्यं तस्मात् वाल्याद्धेतो वा वपुषि समादे सति सखेदे सति कीदृशी सा देवाल्या १८
देवपंक्त्या ।

अर्थितापि याचितापि एवं दृष्ट्वा दृशा स्वरिरंसाद्रा इव स्वस्य रिरंसा रन्तुमिच्छा तां ददा
नीति स्वक्रीडाप्रदा इव कीदृशा दृष्ट्वा अल्पाकुलया भ्रमर इव चञ्चलया ५० ॥
सत्सदासोमाननया रुद्रसमोयः स्वतेजसोमाननया प्रवृत्तःसोमाननया नलोब
भौ भुविगुणेन सोमाननया ५१ ॥ सत्सदृक्षः माननया रुद्रसमः यः स्वतेजस्य उमा
ननया प्रवृत्तः सोमाननया नलः बभौ भुवि गुणेनसः असमान् अनया ५१ ॥
सदिति स नलो बभौ शुशुभे कीदृशः अनया सोमाननया चंद्रवदनया भैम्या प्रवृत्तः प
तिवेन स्वीकृतः सतः यः सत्सदृक्षः सतां देवानां साधूनां वा यत्सदः सभा तस्याः यामानना
तया रुद्रसमः शिवसदृशः रुद्रांशत्वात् अनया कया स्वतेजसा पातिव्रत्येन उमा नेति
न किन्तूमैव एतेन शिवपार्वतीयोगोपि वर्णितः कीदृशो नलः गुणेन शौर्यादिना भुवि
पृथिव्यां असमान् न माति इति असमान् अधिकगुण इत्यर्थः ॥ ५१ ॥ श्लो॰
मदद्रमभावरमस्य ज्ञात्वाथमनोगुरुप्रभावरमस्य स्वरवृषभावरमस्य प्रदिश्य
जग्मुर्गतप्रभावरमस्य ॥ ५२॥ मदद्रमभौ अरं अत ज्ञात्वा अथ मनः गुरुप्रभावरम
स्य स्वरवृषभाः वरं अस्य प्रदिश्य जग्मुः गतप्रभावरमस्य ॥ ५२॥

नं॰ लो॰ टी॰ २

मदेति अथस्वरवृषभा देवश्रेष्ठा इंद्रादयोऽस्य नलस्य वरं प्रदिश्य दत्वा जग्मु र्ययुः वरदाने
हेतुमाह अस्य नलस्य मनश्चित्तं मददम्भौ मदश्च दम्भश्चतो अरं शदिति अस्यत त्यजत
ज्ञात्वा कीदृशस्यास्य गुरुप्रभावरमस्य प्रभावश्च रमा च प्रभावरमे गुर्व्यौ प्रभावरमे यस्य त
स्य, यद्वा गुर्वीप्रभावेन रमा लक्ष्मी र्यस्य एवं गतप्रभावरमस्य गतो नष्टः प्रभायाः कांते
रवरमो ऽशोभनत्वं यस्मात् सः तस्यातिशायितकांतेरित्यर्थः ॥५२॥
॥ गुरुमहिमापरमायालक्ष्मी नलएषवसतिमापरमायाः प्रियमायापरमायाः
स्वपुरमगुर्यत्र तं क्षमापरमायाः ॥५३॥ गुरुमहिमा परमायालक्ष्मी नलः एषः
वसतिं आप रमायाः प्रियया अमा परमायाः स्वपुरं अगुः यत्र तं क्षमापरं आयाः ॥५३॥
॥ गुर्विति एष नलः प्रियया भैम्या अमा सह तत्स्वपुरं स्वनगरमाप प्राप स्यादमा सन्नि
धानार्थे इति हेमचंद्रः कीदृशः गुरुर्महिमा महतो भावो महिमा गुर्वी महिमा यस्य
सः एवं परमायालक्ष्मी परेषां शत्रूणां या माया तस्याः लक्ष्मीरिपुकपटनाशक इत्यर्थः
कीदृशं स्वपुरम् परमाया उत्कृष्टायाः रमायाः लक्ष्म्याः वसतिं स्थानम् तत्किम् यत्र पुरे
आयाः धनागमनानि क्षमापरं सहिष्णुताशीलं तं नलमगुः प्रापुः ॥५३॥

२०

शशिनासमहासमहा नगरेजनतासमहासमहास्समुद अतिभास्वरया स्वरयागाहरद्यतनो
त्सुरयास्वरयागममपि ॥ ५४ ॥ शशिना समहासमहा नगरेजनता समहा समहास्स मुदं ।
अतिभास्वरया स्वरया अहरत् अतनोत् स्वरया स्वरयागं अपि ॥ ५४ ॥ शशिनेति
जनता जनसमूहः नगरे नलपुरे मुदं हर्षं समहास्स प्राप अशोहाङ्गतावित्यस्य धातोः प्रयो
गः ये गत्यर्थास्ते प्राप्त्यर्था ज्ञानार्थाश्च किम्भूता जनता शशिना चंद्रेण समहा समहा
समं हासस्य महस्तेजो यस्याः सा मदश्चोत्सवे तेजसोरित्यमरः एवं समहा मदेन उत्स
वेन सह वर्त्तमाना सा एवं स्वरया शोभनो रवः शब्दो यस्याः सा स्वरया पुनः जनतेव स्व
रया मदिरया अहरत् चिक्रीड स्वरयागमपि देवाह्वनमपि अतनोत् अकरोत् कीदृश्या
स्वरया भास्वरया स्वेच्छया ॥५४॥ इति बोधिनीटीकासहिते श्रीकालिदासकृते नलोदये
मत्काव्ये प्रथमोल्लासः ॥ १॥

अथ रतिरेकान्तेन शापि नलेनात्र मन्दिरेकान्तेन
नाम्नुनेरेकान्तेन श्राभवता रिपुमदातिरेकान्तेन ॥ १॥

नल दिवा

न॰ लो॰ टी॰ २१

अथ रतिः एकान्तेन आपि नलेन अत्र मन्दिरे कान्ते न ताम् पुनः एकां तेन आप्तवता
रिपुमदातिरेकान्तेन ॥१॥ टी॰ अथेति अथानन्तरं कान्तेन कमनीयेन एवं तां भैमीं पुनरेकां
महीं च आप्तवता यद्वा एकां मुख्यां तां भैमीमेव आप्तवता एवं रिपुमदातिरेकान्तेन वि
पूर्णां शत्रूणां मदो गर्वस्तस्यातिरेक आधिक्यं तस्यान्तेन नाशकेन तेन नलेन एकां
तेनातिशयेनाथ मंदिरे रतिः क्रीडा आपि आप्ता यद्वा एकान्तेच मंदिरे रतिः न आपी
ति न किन्तु आप्तैव काक्वर्थे नञ् ॥१॥ श्लो॰ बभौ स सार सागरश्चकास सा रसार्द्रधीः।
मधुः स सार सारवस्तदा स सार सार्णवः ॥२॥ बभौ स सारसागरः चकास सा रसार्द्रधीः
मधुः ससारसारवः तदा ससार सार्णवः ॥२॥ टी॰ बभाविति सारस्य बलस्य सागरः समु
द्रः स नलो बभौ शुशुभे सारो बले स्थिरांशे चेत्यमरः एवं रसार्द्रधीः रसेन प्रेमणा आर्द्रा
रसकोमला धीर्बुद्धिर्यस्याः सा दमयन्ती चकास शुशुभे तदा तस्मिन्नवसरे मधु
र्वसन्तः ससार आजगाम मधुश्चैत्रे तु दैत्येष्विति हेमचंद्रः कीदृशी

मधुः ससारसारवः सारसानामारवः शब्दस्तेन सहितः पुनः कीदृक् सार्त्तवः ऋतौ भ
वमार्त्तवं पुष्पादि तत्सहितः स्वगतानिति पञ्चलिदि समारेति ॥ २ ॥
समुदधिताशालीनां करेणाकणिशाग्ररुचिजिताशालीनां दिनभर्त्ताशालीनामिव
नलिनीमद्यसमुत्थिताशालीनां ॥३॥ समुदधित आशीलानां करेण कणिशाग्ररुचि
जिता षालीनां दिनभर्त्ता षालीनां इव नलिनी अद्य समुत्थिता आशा आलीनां ॥३॥
समुदधीति दिनभर्त्ता सूर्य्यः करेण किरणेन नलिनी समुदधित समुत्थापितवान् वि
काशमासेति यावत् अथानन्तरमलीनां भ्रमराणामाशा इच्छा समुत्थिता उदिता की
शेन करेण षालीनां धान्यानां कणिशाग्ररुचिजिता कणिशाग्रस्य या रुक् तां जय
तीति तत्तेन व्रीहिमञ्जर्य्यग्रकान्तिजिता कणिशं शशमञ्जरीत्यमरः कीदृशीं नलिनीं
आशालीनां चंद्रकरस्पर्शात् आशास्तु दिक्षु लीनां अदर्शनगताम् कामिव शालीनामिव ल
ज्जितामिव अन्यापि परपुरुषकराक्रष्टा लज्जिता भवति परपुरुषभुक्तापि स्वामिना न स्व
का करेणाहृता तत्र षिड्गानां आशा भवतीति भावः अलिः षिड्गेच षट्पदे इति रन्तिः ३॥

न॰ कुरवापचसारसकाकुरवान्कुरवाख्यनगोपितदाकुरवान् कमलंकृतवद्गतपङ्कमलं
लो॰ कमलंनविलोभयितुंकमलम् ॥४॥ कु: अवाप च सारसकाकुरवान् कुरवाख्यनगः
टी॰ अपि तदा अकुरवान् कंअलंकृतवत् गतपङ्कमलं कं अलं न विलोभयितुं कमलं ४॥
२२ टी॰ कुरवापेति तदा वसन्तकाले कु: पृथिवी सारसकाकुरवान् सारसानां काकवो म
नोहरा ये रवाः शब्दाः तान् अवाप प्राप कुरवाख्यनगोपि कुरवद्वृत्तोप्यकुरवान् जात
इति शेषः कमलं पद्मं कञ्जलं अलंकृतवत् शोभयत् एवं पुरुषं विलोभयितुं अलं अपि
तु सर्वानेव रञ्जयितुं समर्थं कीदृशं कम् गतपङ्कमलं गतः पङ्करूपो मलो यस्य तत् त
कर्द्दमरहितमित्यर्थः॥४॥ श्लो॰ अगुरतिमहिमानीततानोरविमहांसिगुरुतमहिमानीतः
भवनंमहिमानीतःस्मेरेणापरितःशराव्यमहिमानीतः॥५॥ अगु: अतिमहिमानि इतस्त
तः रविमहांसि गुरुतमहिमानीतः भवनं महिमानी इतः स्मेरेण परितः शराव्यं अहि
मानीतः॥५॥ टी॰॥ अगुरतीति रविमहांसि सूर्यतेजांसि गुरुतमहिमानीतः अतिशयेन गु
रुर्गुरुतमा गुरुतमा चासौ हिमानी च सा तथा ततः पञ्चम्यास्तसिः इतस्ततः अगुः प्रापन्
कीदृशानि रविमहांसि अतिमहिमा अत्यन्तं महिमा येषां तानि महाप्रभावाणि। २२

मानी अभिमानी सन्नलः मद्दिमह उत्सवसंयुक्तं भवनं प्रसादम् इतः प्राप्तः कीदृशो मा
नी परितः समन्तात् स्मरेण कामेन शराग्रेम् अहिं सर्प्यमानीतः शापितसर्पसदृशस्त्ववा
णगोचरीकृत इत्यर्थः कामपीडया रविरश्मिप्रतापेन च वहिः स्थातुं अशक्नुवन् एवं
गतइतिभावः ॥५॥ श्लो॰ स्मरसूचितयाजगतः स्थितिसूचितयाभवद्धिचम्पकमुकुलं
तदसूचितयाव्यथयानिरसूचितयाययावियुग्दम्पतिकौ ॥६॥ स्मरसूचितयाजगतः
स्थितिसूचितया अभवत् हि चम्पकमुकुलं तत् असूचितया व्यथया निरसूचितया यया
वियुग्दम्पतिकौ ॥६॥ टी॰॥ स्मरेति हि निश्चये तच्चम्पकमुकुलं चम्पककुड्मलं स्मर
सूचितया अनंगसूचे भावितेनाभवत् जातम् तत् किम् यन्मुकुलं जगतः स्थितिसूचित
या जगतः संसारस्य स्थितौ प्रहारे सत्तासूचितया योग्यतया तया तज्जन्यया व्यथया अ
सूचि ज्ञापितम् तया कया यया चिन्तया वृद्धिं प्राप्तया व्यथया वियुक्त दम्पतिकौ विरहित
स्त्रीपुरुषौ निरसू गतप्राणौ कृतौ स्वार्थिकः ॥६॥ श्लो॰ विरलोच्चपलाशस्य प्रसुरम्यधं।
बभूव चपलाशस्य। स्मरनीचपलाशस्य प्राशपाङ्गापिशितचारुचपलाशस्य ॥७॥

न॰ विरलोच्चपलाशस्य प्रचुरं पुष्पं बभूव च पलाशस्य स्मरनीचपलाशस्य प्राश्य अध्वगपि
लो॰ शितचारु चपलाशस्य ॥७॥ टी॰॥ विरल इति पुनः विरलोच्चपलाशस्य विरलानि अप्र
टी॰ चुराणि उच्चानि पलाशानि पत्राणि यस्य पत्रम्पलाशञ्छदनन्दलम्पर्णञ्छदः पुमान्
२४ इत्यमरः तस्य पलाशस्य ब्रह्मवृक्षस्य प्रचुरं पुष्पं बभूव जातम् कीदृशं पुष्पम् चपला
२३ शस्य चपला आशा तृष्णा यस्य तस्य स्मरनीचपलाशस्य स्मर एव नीचः पलाशः पलाशो
23 मांसाशो राक्षसस्तस्य प्राश्यं अध्वगपिशितचारु प्राश्यं भक्षणयोग्यं यत् अध्वगस्य पथि
कस्य पिशितं मांसं तद्वच्चारु मनोहरम् पथिकप्राणहारकत्वेन स्मरस्य राक्षसतुल्यत्वम् ॥७॥
श्लो॰ रतौ बभुर्निशाह्वया विभा विभा विभा विभाः। कलाश्च तेषु सत्पदा रदा रदा
रदाः॥ रतौ बभुः निशाह्वयाः विभा विभा विभौ इभाः कलाः च तेषु सत्पदेः अरदा
रदारदाः रदाः॥८॥ टी॰ रताविति विभाविभाविभौ विभानो रत्यादिकारणं विद्यते
यस्याः सा विभाविनी भा कान्तिः तया विभौ व्यापके रतौ वसन्ते निशाह्वया इभाः निशो
वाह्वा नाम येषां ते इभा हस्तिनः मदजनकत्वात् रात्रिरूपा हस्तिन इति रूपकम् बभुः शु

२४

शुभिरे च पुनस्तेषु रात्रिलक्षणामजेषु सत्स्वेतश्चन्द्रस्य कलाः रदा दन्ताः बभुः कीदृशाः
रदा अदारदा रदाः अदाराः जायारहिता स्तेषां दारदाः दारं हृदयविदारणं ददतीति
ते यद्वा किम्भूते सतो विभौ विशेषेण शोभमाने किम्भूता इभाः विभाः विशेषेण
शोभमानाः किम्भूता रदाः विभाः विशेषेण शोभमानाः ॥८॥ श्लो॰ इहललनाशोका
लिप्रदेन येनात्ममदविनाशोकालि। कामनाशोकालिस्त्वनहंकृतिभिः सदित्वना
शोकालि॥९॥ इहललनाशोकालिप्रदेन येन आत्ममदविनाशः अकालि कामेन
अशोकालिस्त्वनहंकृतिभिः सःदित्वः अनाशः अकालि।९। टी॰ इहेति इह वसन्ते ल
लनाशोकालिप्रदेन येन ललना स्त्री तस्याः शोकस्यालयः पंक्तयस्ताः प्रददातीति का
मिनीविरहं विलापयता येन पुरुषेणात्ममदविनाशः आत्मनो यो मदः कामोत्सवलस्य
विनाशः अकालि अकारि स पुरुषः दित्वः दिशास्तु अशोकालिस्त्वनहंकृतिभि रशोक
वृक्षसम्बन्धिनो कारणेन कामेन अनाशः आशा वाञ्छा तया रहितोपि अकालि अबंधि
जितेंद्रियोपि वसन्ते भ्रमरशाखादिना बद्धो भवतीति भावः अथवा न विद्यते नाशो यस्य

न॰ लो॰
टी॰
२४
२५

स मृत्युञ्जयतुल्योपि कामेन ग्रबंधि इत्यर्थः ॥१९॥ श्लो॰ स्मरस्य युद्धंगमिता रसा रसा रसा
रसा जितावियोगिनः समुन्नते नते नते नते ॥१॥ स्मरस्य युद्धरङ्गंता रसा स्सार सार
सारसा जिताः वियोगिनः समुन्नतेननतेन तेन ते ॥२॥ टी॰। स्मरस्येति सारसारसा
साराः श्रेष्ठाः सारसाः पक्षिणो यस्यां सा रसा पृथ्वी स्मरस्य युद्धरङ्गंतां समरभूमिभावं
स्सार प्राप समुन्नतेन तेन सम्यक् प्रकारेणोन्नता उत्कृष्टा इनता प्रभुता यस्य स तेन
कामेन ते पुरुषाजिताः स्ववशीकृताः ते के ये वियोगिनः सस्त्रीकाः स्त्रीरहिता वास्म
रताय पराजिताः सन्तः स्त्रीभिः मङ्गामक्ता बभूवुरिति भावः यद्वा कीदृशी रसा सारसा
रसा स्सारस्सत इत्यारसः शब्दः सारसानां यः शब्दस्तद्विशिष्टा ॥१॥ श्लो॰ तुन्नमनामधु
नानाश्रयतिमृतिंकोविनाङ्गनामधुनाना इतिमधुनाललनामधुनानाविधमधय
त्किलतदर्थनामधुनाना ॥३॥ तुन्नमना मधुना न स्साश्रयति मृतिं कः विना अङ्गनां
अधुना ना इति ललना मधु नानाविधं अधयत् किल तदर्थिनां अधुनाना ॥११॥
टी॰ तुन्नेति अधुना वसन्तसमये मधुना वसन्तेन तुन्नं प्रेरितं मनश्चित्तं यस्य स कः

२५

ना पुरुषो योऽङ्गना रमणी विना मूर्तिं मूर्तं न प्राप्नयति न प्राप्नोति अपि तु सर्वोपि
मूर्तिं प्राप्नयत्येव किल सत्य इति हेतोर्ललना स्त्री नानाविधं नानाप्रकारं मधु मद्यं अ
पाययत् अपिवत् कीदृशी ललना तदर्थनां तस्य नायकस्यार्थना याच्ञा तां अधुनाना अ
निराकुर्वाणा अंगीकुर्वाणेत्यर्थः रतिसमये पुरुषः अस्माकं वशतामेष्यतीत्यानंदेन
मधु अपाययदिति भावः यद्वा तन्मरणाशङ्कया मधु अधरामृतं अपाययदिति भावः ११ ॥
श्लो॰ पिको पिको पिको पिको वियोगिनीरभर्त्सयत् वचांसि भङ्गमालपन्निता निता
निता निता:॥१२ पिकेति कोपिकः कोपोऽस्यास्तीति कोपी कोप्येव कोपिकः सकोप
इत्यर्थः यद्वा कोपयतीति कोपिकस्तामामेव कोपकर्त्तेति यावत् अपि सम्भावनायां एता
दृशः कोपि पिकः कोकिलस्ता वियोगिनीरभर्त्सयत् भर्त्सितवान् भर्त्सनं त्वपकारगीरितनरः
किं कुर्वन् भङ्गरचनाविशेषं इमानि प्राप्तानि तानि तानि वचांसि वसन्तकालीनानि आल
पन् कुर्वन् ॥ १२॥ श्लो॰ श्रीरापिकलापेन प्रवृद्धमाघावलिषु पिकलापेन । नकला
पिकलापेनप्रणात्तनमकारि वागपिकलापेन ॥ १३॥ श्री: आपिकलापेन प्रवृद्धं आ

न॰ लो॰ टी॰ २६५ २५

म्रावलिषु पिकलापेन । न कलापिकलापेन प्रार्त्तिनं अकारि वाग् अपि कला आपे
न ।१३। टी॰ । श्रीरापीति कलापेन कलाः पातीति कलापश्चन्द्रस्तेन श्रीः शोभा आपि
प्राप्ता पिकलापेन पिकानां लापः संलापस्तेन आम्रावलिषु आम्रवृक्षपंक्तिषु प्रवृद्धं
अति वृद्धिं प्राप्तम् कलापिकलापेन कलापा बर्हा येषां सन्तीति कलापिनो मयूरास्ते
षां कलापेन शब्देन प्रार्त्तिने प्रकृष्टं त्वं नाकरोतीति न किन्तु कृतमेवेत्यर्थः पुनः
कला परिस्फुटा वागप्याप प्राप्ता ।१३। श्लो॰ । सहकारहृते समये सहकारहरणस्य के
न सस्मार पदम् सहकारमुपरि कान्तैः सहकारमणी पुरः सकलवर्णामपि ।१४।
सहकारहृते समये सहकाः रहणस्य के न सस्मार पदम् । सहकारम् उपरि कान्तैः सह
का रमणी पुरः सकलवर्णाम् अपि ।१४। टी॰ । सहकारेति सहकारहृते सहकार आम्र
वृक्षस्तत् पुष्पमपि सहकारं तेन हृते समये वसन्ते केपुरुषाः रहणस्य स्त्रीविरहजन्य
दुःखस्य सहकाः सहनक्षमाः न केपीत्यर्थः का रमणी स्त्री कान्तैः सह भर्तृभिः सह
उपरि अन्ते सहकारं हकारवर्णसहितं पुर आदौ सकलवर्णामपि कस्य लस्य कलौ वर्णौ

२६५ २५

ताभ्यां सहितं पदं वाक्यं कलहमिति यावत् न सस्मार न स्मृतवती तथा च सैवैव क
लहं विस्मृत्य कान्तमङ्कमं चकारेति भावः । १४॥ श्लो॰ । अधिगतकामधुरागाद्गमेत्यभ्र
मरपटलिकामधुरागात् । पीत्वोत्कामधुरागाद्रुतमहात ततः श्रियोधिकामधुरागात् ।
१५। अधिगतकामधुरा अगात् अगं एत्य भ्रमरपटलिका मधुरागात् । पीत्वा उत्का म
धुरागात् द्रुतं अह्नात ततः अधिकाः मधुः आगात् ।१५। टी॰ । अधीति रागात् प्रीतेः मधु
पुष्परसं पीत्वा द्रुतं पीत्वं उत्का उत्कण्ठिता सती अधिगतकामधुरा अधिगता प्राप्ता
कामस्य धूः भारो यया सा तथैव तत् कर्तव्यमिति स्वीकृतमन्मथाज्ञा समुद्योयति यावत्
एवम्भूता भ्रमरपटलिका मधुपश्रेणि रागात् वृन्दात् अगं वृन्दमेत्य प्राप्य मधुराः गाः
वाणी रङ्कृत अकरोत् ततः भ्रमरमधुरगुञ्जितात् मधु वसन्तोऽधिकाः श्रियः शोभा आ
गात् प्राप ।१५। श्लो॰ । नससमा नससमा नससमा नससमा ' गममापसमीत्य वसन्तनभः
भ्रमद भ्रमद भ्रमद भ्रमद भ्रमरच्छलतः खलु कामिजनः । १६। नसः मानसमान
समानममागमम् आप समीत्य वसन्तनभः ' भ्रमदभ्रम भ्रदभ्रमदभ्रमदभ्रमच्छलतः
खलु कामिजनः ॥ १६॥

नः लो॰ २७८ २८ ३८

नसमानेनेति खलु निश्चये कामिजनः कामुकसमूहः समानसमानसमानसमागमं न
प्राप मानसे मानो मानसमानत्वेन सह वर्त्तमानः समानसमानः समानसमानश्चासौ
समानः बंधुश्च मनोवर्त्तिमानसहितबंधुरिति यावत् तस्य समागमं न प्राप्यति का
कुः प्राप्यैवेत्यर्थः यदा स कामिजनः मानसे चित्ते यो मानः तेन समानस्तुल्योयः समा
गमः तं खलु निश्चितं न प्राप किन्तु वसन्तोद्दीपः सन् अकालसमागमं प्राप्येत्यर्थः
किं कृत्वा वसन्तनभः वसन्तसम्बन्धिनभ आकाशं समीक्ष्य दृष्ट्वा कीदृशं नभः अदभ्र
मदभ्रमदभ्रमरच्छलतः भ्रमदभ्रम् अदभ्रं बहुलं मदो येषां ते अदभ्रमदाः मेघमा
लात्वेन स्वस्मिन् भ्रमं ददतीति भ्रमदाः अभ्रमदाश्च ते भ्रमदाश्च ते भ्रमराश्च तेषां छ
लतो व्याजात् भ्रमन्त्यभ्राणि मेघा यत्र तत् अभ्रमेघो वारिवाहः अदभ्रमब्दः स्तनमरः
२६॥ श्लो॰ गतमत्रचयेन गृहादसमुत्तरतान्तरतान्तरतान्तरतां। परपवविकारइ
यायबृहत्तमसन्तमसन्तमसन्तमसान् ।२७। गतम् अत्रचयेन गृहात् असमुत्तरता
अन्तरतान्तरतान्तरतां पर पव विकारः इयाय बृहत्तमसन्तमसं तं असन्तं असन् २७
टी॰।। गतमिति अत्र वसन्तसमये च पुनर्येन पुरुषेण गृहाद्गते निर्गते परः शत्रुः २७८

विकारो धातुविकार एव तं इयाय प्राप कीदृशेन अन्तः अतान्तर तान्तरतां असमन्तरता
अन्तः हृदि अतान्तं अविलीर्णं यदन्तरतान्तरं स्वरतान्तरं तस्य भावस्तत्ता तां असमन्तरता
अप्राप्तवता यद्वा अन्तः हृदि अतान्तं असमाप्तं रतं यस्याः सा अतान्तरता अन्तर्मनसा अत
ति स्वामिनं गच्छति सततं ध्यायतीति यावत् सा अन्तरता अतान्तरता चासौ अन्तरता चेति
सा तां असमन्तरता उल्लंघयता त्यक्तवता तत्रभवनतरणयोरिति किम्भूतं पुरुषम् दृढ
तमसः तमसं दृढतमं अधिकं सन्तमसं अज्ञानं यस्य तम् एवं असन्तमविवेकिनं कीदृशः
विकारः असन् अपरिहार्यः साधुर्वा ॥२७॥ श्लो ॥ क्रुधि कान्तवशान्नवदामसमापनया
पनयापनयापनया । तमृते ऽनुशयेन च तामसशानै रवता रवता रवता रवता ॥२८॥
क्रुधि कान्तवशं नवदामसमापनयापनया आपनया अपनया । तमृते अनुशयेन च
ताम् अशनैः अवतारवता आरवत अरवता ॥२८॥ टी० क्रुधीति या स्त्री क्रुधि क्रोधे
सति नवदामसमापनयापनया नवञ्च तद्दाम च नवदाम नवीना माला तस्याः समापनं
समाप्तिः याया यापना कालातिक्रमणेन करणेन कान्तवशा नायकसमीपं न आपनं

न. लो. २५ २७

आप यापने कालविक्षेपे इति ~~हेमः~~ कीदृशी या अपनया अपगतो नयो नीतिर्यस्याः
सा अवता मत्कृते अनुशयेन पश्चात्तापेन सह अशनैः शीघ्रं तत्कान्तं स्मरेते विना
तो नायिका आर प्राप कीदृशेनानुशयेन आसमत्वात् अवतारवता अवतारोऽस्या
स्तीत्यवतारवान् तेन तदानीमुत्पन्नेन वत खेदे ॥१८॥ श्लो॰ नभसोविवरंकुसुमेक्षणा
भागतरो गतरो गतरो गतरे वदकान्तमवेक्ष्ययथाद्यमया वरमे वरमे वरमे वरमे ॥
नभसः विवरं कुसुमेक्षणाभाग् अन्तरः गतरोगतरः अगतरो वदकान्तम् अवेक्ष्य
यथा अद्य मयो अरं एव रमा एव रमे वरमे ॥१९॥ नभस इति हे वर श्रेष्ठ अगतरो द
मर्वेन संबन्धि हृदन्तं नभस आकाशस्य विवरमंतरं अन्तरः तीर्णवानस्मि अनुक्षोसोऽयमर्थः
कीदृशस्त्वम् कुसुमेक्षणाभाक् कुसुमान्येवेक्षणानि नेत्राणि तद्भाक् तद्युक्तः एवं गत
रोगतरः अतिशयितो रोगो रोगतरः गतो रोगतरो यस्य यस्माद्वा स दुःसहरोगरहित इ
त्यर्थः अतो मे कान्तमवेक्ष्य दृष्ट्वा तथा वद कथय यथा अद्य मयो वसन्त अरमेव श्री
अमेव रमेव लक्ष्मीरिवाऽरमे क्रीडां करोमि लघुद्विपमरंदुतम् नीराध्मिनयारेम~~त्यास~~ः १९॥

॥श्लो॰॥ श्रितेति गामनागतस्वबन्धुकामनाभागतः परापनामनागतस्तन्नामकामनागतः॥२०॥
श्रिता इति गाम् अनागतस्वबंधुका मनाक् अतः परा आप नाम न आगतः तन्नाम कामनागतः॥२०॥
टी॰ श्रितेति परा उत्कृष्टा नायिका इत्येन प्रकारेण श्रिता आश्रिता अर्थात् हृत्तमेव अतः अग
त एतस्मात् हृत्तात् मनाक् ईषदपि गांप्रत्युत्तरवचनं न आप न प्राप कीदृशी अनागतस्व
बंधुका न आगतः स्वकीयो बंधु भर्त्ता यस्याः सा नाम निश्चये कामनागतः काम एव नागः
कृष्णसर्प्पस्तस्मात् तन्नाम नाम्यतिस्म अनेन अलापोन्मादव्याधय इति निस्रोदशः सूचिताः॥२०॥
श्लो॰ का ललनादिवसन्तं कुसुमशरमसोढ हृद्यनादिवसन्तम्। अलिभिरनादिवसन्तं दृष्ट्वाय
आत्मनोऽर्थनादिवसन्तम्॥२१॥ का ललना दिवसं तं कुसुमशरं असोढ हृदि अनादि
वसन्तं अलिभिः अनादि वसन्तं दृष्ट्वा यत्र आत्मनः अर्थनात् इव सन्तं॥२१॥ टी॰। केति का
ललना कामिनी तं दिवसं तस्मिन् दिवसे वसन्तस्तेतो कुसुमशारदमसोढ सहितवती न का
पीत्यर्थः दिवसमिति कालाध्वनो रत्यन्तसंयोगेति द्वितीया किम्भूतं कुसुमशरं हृदि मान
से अनादि सर्वदा वसन्तं स्थितमन्तम् यत्र दिवसे सन्तं वर्तमाने वसन्ते ऋतौ दृष्ट्वा अलिभि

न॰
लो॰ २९
२८
२४

भ्रमरै रतनादि नादो ऽकारीत्यर्थः उत्प्रेक्षते आत्मनो ऽर्थनादिव आत्मीयस्मरतन्त्रप्रार्थनादिव
तथा च कीटा अपि स्मरतं प्रार्थयन्ति किमुत मानुषीति भावः ॥२१॥ श्लो॥ स्वयमथ मन्दा
रितया युक्तो ऽयुक्तो नलः स मन्दारितया । आरामन्दारितया मदनेन धियापदुत्तमंदारित
या ॥२२ स्वयं अथ मंदारितया युक्तः युक्तं नलः सः मन्दारितया। आरामंदारितया मदने
न धिया आपत् उत्तमं दारितया ॥२२॥ स्वयमिति अथानन्तरं स नलः स्वयं मन्दारितया
युक्तं मंदारा अस्य सन्तीति मन्दारी मन्दारिणो भावो मन्दारिता तया युक्तं सहितं मंदारवृ
क्षसमृद्धसहितम् उत्तमं श्रेष्ठमारामम् उपवनमापत् प्राप कीदृशो नलः मन्दारितया यु
क्तः मन्दा अलयो ऽस्य सन्त्यसौ मंदारी तस्य भावस्तत्ता तया सहितः कर्तव्यविचारानभिज्ञ
शात्रुत्वसहितः यद्वा मंदश्चासौ अरिश्चेति मंदारिः तस्य भावः मंदारिता तया हेतौ तृतीया शा
त्रुभावेन कामेन खंडितधिया युक्तः इत्यर्थः एवं मदनेन स्मरेण दारितया खंडितया बुद्ध्या
युक्तः एवं दारितया युक्तः दारा अस्य सन्तीति दारी दारिणो भावो दारिता तया सहितः
स्त्रीमतया संयुक्तः ॥२२॥ श्लो॰ अनुज्ञता समानन्दं समाननन्द भीमजा । तमिन्दुना समानने

२९८

समाननन्दने वने ॥२२॥ अनुव्रता समानने समा ननन्द भीमजा तेइन्दुना समानने समा
ननन्दने वने ॥२२॥ अनुव्रतेति समानने मानना पूजा तया सहितं पूज्यमित्यर्थः इन्दुना
समाननं चन्द्रसदृशमुखं तं नलं अनुव्रता अनुगता अनुबद्धा वा समसा सलक्ष्मी का भीम
जा दमयन्ती समाननन्दने समानं सदृशं नन्दनं इन्द्रवनं यस्य तस्मिन् वने ननन्द आनन्द
प्राप्तवती समाननन्देति वा क्रियापदम् ॥२३॥ श्लो॰ । इह रुचिरामावलयस्य दृशामितिपृ
थक प्रियस्य रामावलयः । प्राप्तारामावलयस्फुरो गिरा यद्दरेऽभिरामावलयः ॥२४॥ इह
रुचिरं आवलयस्य दृशं इति पृथक् प्रियस्य रामावलयः । प्राप्तारामावलयस्फुरः गिरा
यद्दरे अभिरामाः वलयवलयः २४॥ टी॰ इहेति हे सुंदरि इह वने रुचिरं मनोज्ञं दृशं
चक्षु आवलयस्य आवर्जय इत्यनेन प्रकारेण प्रियस्य भर्तुः गिरा वचनेन ताः रामावलयः
स्त्रीश्रेणयः पृथक् एकैकशः प्राप्तारामा आरामगता अभूवन् आरामं जग्मुरित्यर्थः की
दृश्यः वलयैः कटकैः स्फुरन्तीति क्विप् वलयस्फुरः कटकं वलयोऽस्त्रियामित्यमरः
अथ वा प्रियस्य वचनेन स्फुरस्तुष्टा बभूवुः कथम्भूताः प्राप्तारामावलयः प्राप्ता आ
रामाणां आवलयो याभिस्ता इत्यर्थः ताः काः यद्दरे यासामुदरेऽभिरामाः सुन्दरा

न॰ लो॰ २८ २९ २७

वलयस्त्रिवलीभङ्गा इत्यर्थः करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियामित्यमरः
।२४। नवकुसुमानमनागा गन्तुं नैच्छत्परा समानमनागाः। अजनि पुमानमना
गाश्रित्य सत्कुसुमदानमानमनागाः ।२५॥ नवकुसुमानमनागाः गन्तुं नैच्छत्तु
परा समानमना गाः अजनि पुमान् अमनाक् आश्रित्य सः सत्कुसुमदानमाने
अनागाः ।२५। नवेति नवकुसुमानमनागाः नवैः कुसुमैरानमन्तीति नवकुसुमानम
नाः तादृशा अगा वृक्षा यासु ता गाः वनभुवः गन्तुं यातुं पराऽन्या स्त्री नैच्छत्त्राया
सीदिति कीदृशी समानमनाः समानेन मानसहितेन मनो यस्याः सा कृतमानेत्यर्थः स पुमान्
सापराधः पुरुषः अमनाक् अनल्पं सत्कुसुमदानमाने कुसुमानां दानमेव मानः स
म्मानना तामाश्रित्य अनागा निरपराधोऽजनि जातः स पुष्पवनं गन्तुमनिच्छन्त्या मा
निन्याः स्वावचितसत्पुष्पदानेन मानमपाचकार सत्कुसुमदाममदानमिति पाठे पुष्प
मालादानमाश्रित्येत्यर्थः ॥२५॥ श्लो०। रुषितं समविसादमसुष्यलसत्तनुतेतनुतेतनुतेतनुते।
ननवा ननवा ननवा ननवा गिह्नते चरणैर्मृतिमैष्यति सा। ॥२६॥ रुषितं सविष
मादं असुष्यलसत्तनुतेतनुते तनु ते तनुते। न नवाननवाननवान् अनवाक् इह ते रु

२८

चरणे मृतिम् पश्यति सः २८॥ तृषितमिति नायकप्रेरितदूतीवाक्यं हे सखि लसन्ते
तेन तनुते लसन्ती तनुर्यस्याः असौ लसत्तनुः सद्भावसत्ता तया इता प्राप्ता नतिस्तुतिर्यया
सा तत्संबुद्धिः कमनीयशरीरतालब्धसत्ते न तव नवं स्वल्पमपि तृषितं शेषा ऽ मुष्य तव
प्रियस्य सादमवसन्नतां तनुते विस्तारयति त्वयि रुष्टायाम् अस्य बहुदुःखं जायत इति
भावः स तव कान्तः इहास्मिन् वसन्ते ते चरणे तत्पदे ऽ नवाक् अवाक् अधोमुखः
न अवाक् अनवाक् अभिमुखः अथ वा अवाक् मूकः अनवाक् स्तुति वाक्यसहितः
सन्नित्यर्थः कम्भूतः वानं नवानं नवानं वानं शुष्कं नवं यौवनोदयसंदष्मानं ते मुखं य
स्य सः तादृशः सप्रियः मृतिं न पश्यति इति नापि तु भविष्यत्येव त्वच्चरणपतितस्यास्य
प्राणास्तिष्ठंति नो चेत् मदनव्यथया शुष्कमुखस्य मरणमेवेति भावः मृतिमित्यत्र नति
मिति पाठे नतिं प्रणामं पश्यतीत्यर्थः स्तवः स्तोत्रं नतिस्तुतिरित्यमरः वानं शुष्के गतौ
गन्धे इति वैजयंती पराङ्मुखः पराचीनः स्यादवाङ् प्यधोमुखः इत्यमरः शरणागतावित्य
स्य लटि पश्यतीति ॥२८॥ श्लो॰ अपि चैत्यनगानवतानवता नवमानवतास्ततामयुतः॥

नृ॰ इह सौख्यमगोचरमाचरमाचरमाचरमास्य न रम्यतरा ।२७। अपि च पत्य नगान् अवता
लो॰ नवता नवता न वन अस्ततरा मधुना । इह सौख्यं अगोचरं आचर मा चरमा चरमा अ
२९ स्य न रम्यतरा ।२७। टी॰ ॥ अपीति पुनस्तामेवाह हे सखि अवतानवता अवतानो वि
रः स्तारो ऽस्यास्तीत्यवतानवान् तेन मधुना वसन्तेन नवता नवीनता न अस्ततरा ऽतिश
30 येन त्यक्ता वाताश्चर्ये किन्तु वसन्तो नूतनतां त्यजिष्यत्येवेतिभावः किं कृत्वा नगान्
वृक्षानेत्य प्राप्य इह प्रौढवसंते ऽगोचरं वक्तुमशक्यं सौख्यं आचर लभस्व अस्य व
सन्तस्य चरमा पश्चिमा रमा लक्ष्मीश्च पुनः सा शोभा रम्यतरा सुन्दरी न भवति व
सन्तमध्ये भर्त्रा सह रत्यादिकं सुखमनुभूयतां पश्चात्तनी शोभा तु न भवेतीतिभावः नु
न्ननुमाल्लानिष्ठूता विद्वद्विप्रविनाः समाः नवीनो नूतनो नवः आचरेति चरगति
भक्षणयोरित्यस्य लोटि ।२७। स्लो॰ ॥ इतिलालिकयालिकयातकचेऽतिकयालिकया
लिकयाकथिता । दयितं समया समयात् अपराग्वहरत् समया समया च नया ॥२८॥
इति लालिकया अलिकयातकचेः अतिकालिकया आलिकया कथिता । दयितं सम

या समयात् अपरा व्यहरत् सः मया समया च तया। २८। टी॰ इनीति इत्यनेन प्रकारेण ला
लिकया लालयन्त्या अलिकया सख्या कयाचिना उक्ता अपरा स्त्री दयितं समया भर्तुः समीपं
समयात् अगात् दयितमिति समयायोगे समया अभित इत्यादिना द्वितीया, समयान्तिक
मध्ययोरित्यव्ययवर्गे मेदिनी समयादिति यातेर्लुङि॰ च पुनः स कामुकः मया ललन्त्या
समया तल्पया तथा स्त्रिया सह व्यहरत् विचिक्रीड कीदृश्या अलिकयातकचैरलिके
याता प्राप्ताये कचाश्चूर्णकुन्तला स्तैर्दनिकालिकया श्यामलया सख्या वा विशेषणम्
ललाटमलिकं गोधिः कचः केशः शिरोरुह इत्यमरः। २८। श्लो॰। अतिरुचिमानलवकः
सरलतटोयं विचीयमानलवकः इह खलु मानलवकः प्रियामिति परोनयत् समानलवकः॥
२९॥ अतिरुचिमान् अलवकः सरलतट। अयं विचीयमानलवकः इह खलु मानः तव
कः प्रियां इति परः अनयत् समानलवकः। २९। अतीति कश्चिन्मानवतीं मानयन्नाह
हे सुन्दरि अयं विचीयमानलवको विभीः पक्षिभिः भ्रमरप्रभृतिभिश्चीयमाना मकर
न्दपानायान्विष्यमाणाः लवकाः पुष्पगुच्छा यस्मिन् तादृक् अथवा विचीयमाना

न॰ लो॰ ३१

अवचीयमानाः समृद्धाः स्तवका यस्मिन् तादृक् अतस्तवकः अस्ता गता वका यस्मात्
तादृक् सरस्तटः तडागतीरं अतिरुचिमान् अतिसुन्दरः इहास्मिन् स्थले तव कः मानः ख-
लु निश्चितं कः प्रस्तावः इति क्रमेण समानस्तवकः समानः मानसहितः सादर इति यावत्
स्तवकः स्तुतिर्यस्य स तादृक् कामुकः प्रियं स्त्रियं अनयत् अनैषीद्दूत्यै इति यावत् पुष्पवास-
लोभभ्रमद्भ्रमरे वकादिशाद्वितीयेन निर्जनेमानाः नुचित इत्येतादृशास्थलाभावादिह समभो-
गो भवतीति हस्ते गृहीत्वा कुञ्जे प्रविशादिति भावः अनयदिति नियोलङ्. २९ ॥ श्लो॰
अरुणानरपरागस्य प्रसवमैद्दिष्ट न पुनरपरागस्य हसितैरपरागस्य स्वैस्तिष्ठन्नपि
लवेष्वरपरागस्य ।२। अरुणानरपरागस्य प्रसवं प्रैद्दिष्ट न पुनः अपरा अगस्य हसितैः
अपरागस्य स्वैः तिष्ठन्नपि लवेषुः अपराक अस्य ।३। अरुणेति अपरागन्याद्भुतानारु-
णानरपरागस्य अरुणानराः अतिशये नारुणाः परागाः कुसुमरजांसि यस्य तादृशस्यास्य
अगस्य वृक्षस्य स्वैः स्वकीयैः हसितैः हासैः रपरागस्य अपगतलौहित्यस्य अपराक् संमुखे
लवेष्वः पुष्पमवचिकीर्षुस्तिष्ठन्नपि विद्यमानापि प्रसवं पुष्पं न पुनः प्रैद्दिष्ट नापश्यत्

३१

31

३१

लोहितकुसुमस्य स्वहासेन शुक्लीभूतत्वाद् विस्मयो जात इति भावः लवोऽभिलावो लवने
स्यादुत्पाटे फले पुष्पे प्रसवो गर्भमोचने शे लहृदैौ नगावगो इत्यमरः इति दर्शितांकनयो
रित्यस्मात् प्रपूर्वो लुङ्गादित्मिचीटित्रूपम् ॥२०॥ श्लो॰ अवेत्य पल्लवालयानगान् श्रितालवा
लया ललनेयेव बालया बभेः न्यया ववालया ॥२१॥ अवेत्य पल्लवालयान् अगान् श्रि
तालवालया। लतालया एव बालया बभे अन्यया ववालया ॥२१॥ टी॰ अवेत्येति अन्यया
बालया षोडशवार्षिकया ललनया इव लतातेन रूपेणैव बभेशुशुभे अन्याका या पल्लवाल
यान् नवपत्रयुक्तान् अगान् वृक्षान् अवेत्य दृष्ट्वा ववाल उल्ललास अन्यापि लताश्रिताल
वाला आश्रयभूतान् वृक्षान् दृष्ट्वा उल्ललसेवेति भावः यद्वा ववाल चचालेत्यर्थः यथा लता
वृक्षानधिरोहितं चलति तथेति भावः बलप्राणने सवलने वा धातोः रूपं कथम्भूतया श्रि
तालवालया पल्लवानयानार्थश्रितं आश्रितं आलवालं यया तयेत्यर्थः ॥२१॥ श्लो॰ व्रततीना
मालीनांमध्येन्या व्यचिनुताङ्कनामालीनाम् । अप्येनामालीनांस्मितांच्चजानन् मदाञ्चनामा
लीनाम् ॥२२॥ व्रततीनाम् आलीनां मध्ये अन्याः व्यचिनुत अङ्कनां आलीनां । अपि एनाम्

न॰ लो॰ ३२ 32

आलीनां स्थितात् च जानन् मदात् च नाम आलीनां ॥३२॥ टी॰। व्रततीति अन्यः कामी
आलीनां सखीनां स्मितात् हासात् पुनरलीनां भ्रमराणां मदात् जानन्नपि कलयन्न
पि अङ्कुना स्त्रियं यचिन्नतविलोकयामास किम्भूतां व्रततीनां लतानां मध्ये आली
नां सखीनाञ्च मध्ये आलीनां गुप्तानामसम्भावनायाम् आदौ सखी एव लता इति ज्ञा
नमासीत् इदानीं काचित् हसति कुत्रचित् भ्रमराः स्वनन्ति इति ज्ञात्वा तत्राङ्कुना नाम
अन्वेष्टुं गतवतीमर्थः ॥३३॥ श्लो॰ कामितुः कलुषादिसखार्थनभागपरागपरागपराग
परा स्थितिमाप तथैव हृतः सपुमाननया ननया ननया ननया ॥३३॥ कामितुः कलुषा
दिसखार्थनभाग् अपरागा अपरा अपरागपरा। स्थितिम् आप तया एव हृतः सपुमान्
अनया आननया ननया न नया ॥३३॥ टी॰। कामितुरिति अगपरागपरा हृतमकरन्द
ध्यानोन्मुखी अतएव कलुषादिसखार्थनभाक् कलुषं परागेण यद्दादि तस्य यत् सखं
परागनिष्कासनात् तस्य योऽर्थना याच्ञा तां भजतीति तद्भाक् अपराङ्गना कामितुः
कामयतीति कामिता भर्त्ता तस्यापराक् संमुखं स्थितिं स्थानेमाप प्राप अनया अङ्कनया

स पुमान् पतितस्तथैव तेन प्रकारेण भर्त्तुरभिमुखस्थितिर्बेन न हृत इति न किन्तु व
शीकृतः अनयाकया आननतयाननया आननं मुखं तस्य यानं भर्त्तुर्मुखसमीपप्रापणं तत्र
नयो वैदग्ध्यं यस्याः सा नयनपतितमकरन्दं दूरीकुर्व्वति नायकाभिमुखं मुखं प्रसारयन्ती
ते जहारेतिभावः। २२। श्लो॰ स्वमेनेनसमायतयाबाधितागाः स्वेवकश्चनसमायतया। ऋ
जुमानसमायतया तस्मै नाक्रोधि जीवनसमायतया॥ २४॥ स्वं एनेन तस्मै आयतया बाधित
आगाः स एव कश्चन समायतया ऋजुमानसे आयतया तस्मै न अक्रोधि जीवनसमाय
तया। २४। टी॰। स्वमिति कश्चन कामी तस्याः स्वभार्य्यायाः अग्रे आयतया अतिदीर्घया समा
यतया मायया कपटेन सह वर्त्तमानः समायस्तस्य भावः समायता तया सकपटत्वेन
आगाः स एव अपराधेषु सत्स्वपि स्वमात्मा तम् अनेन समपराधरहितं बाधितं चक्रे ऋजु
मानसे कोमलचित्ते आयतया प्राप्ततया अर्थात् कामिन्या जीवसमाय प्राणवल्लभाय तस्मै
भर्त्रे नाक्रोधि न कुपितम्। २५॥ श्लो॰। अभवदेनानाविस्मयदोन्या मानिनीजनेनाना
वि अतिसृजेनेनानाविसवलनं यद्रुपवनमेनेनानावि। २६। अभवत् अनेनाः नाविस्मयदः

वि

न॰
लो॰
३२
३२
33

अन्यः मानिनीजने नानावि अतिसृजनेन अनाविस्खलनं यत् उपवनं अतेन अनावि
२५। टी॰। अभवदिति मानिनीजने विस्मयदोऽह्लनदोऽन्योऽपरो नाप्रहृष्टः ततः तस्मा
द्धेतोरनेना अनपराधोऽभवत् अभूत् यत् यस्मादनेनातिसृजनेनापि सहसृजनेन पुंसा
नानावि नानाविधा वयः पक्षिणो यस्मिंस्तादृशम् उपवनमारामोऽनाविस्खलनं वर्णा
नांवैपरीत्यमपशब्दादिवा तदूरदितं यथा स्यात् तथाऽनावि स्तुतम् कृतपराधः कश्चित्
पुमान् उद्यानवर्णानेघेव तां प्रासीदयदिति भावः अभावीति णुस्तुतावित्यस्य चिणि
लुङि रूपम्। २५। श्लो॰ जनादसोः समाननः पदाहतिं समाननः। परो दधौ समाननः स्व
मूर्द्धि भास्समाननः। २६। जनात् असोः समाननः पदाहतिं समाननः। परः दधौ समा
ननः स्वमूर्द्धि भास्समाननः। २६। टी॰ जनादिति परोऽन्यः कामुकः असोः समाननः अ
सुः प्राणाः तस्य समाननः सदृशात् प्राणतुल्यात् समाननः माहङ्कारात् भास्समाननः शो
भमानात् जनात् कान्ताजनात् पदाहतिं चरणोआहतिं आघातं समाननोऽतिनम्रः
सन् स्वमूर्द्धि दधौ स्वशिरसि प्रसादमिव दधावित्यर्थः। २६। श्लो॰ ततुच्छिदान्तमालया
३२

तयाभुवोत्तमालया । अहारि शीतमालयानिलावधूतमालया । ३७ । तनुच्छदा उत्तमा
लया अहारि शीतमालयानिलावधूतमालया ॥३७॥ टी० । तनुच्छदेति तया उद्यानभुवा
उत्तमालया उद्गता उत्क्षिप्ताः तमालवृक्षा यस्यां सा तादृश्या पुनः शीतमालयानिलाव
धूतमालया शीतो यो मलयो ऽनिलो मलयगिरिसम्भवो वायुः तेनावधूताकम्पिता
माला वृक्षश्रेणी यस्यां तादृश्या भुवा उत्तमस्थालयो गृहं यस्याः सा तादृ
शी तनुच्छदा स्त्रीसमूहो ऽहारि हृता तथा च मन्दसुगंधिशीतलवायुसम्बन्धेन मनोहरे
उद्याने कान्तसहिता सर्वविलासिन्य उत्तमगृहं त्यक्त्वा रमणार्थं ययुरिति भावः वल्लि
तेषु खिताधूतवलिताकम्पितायुते श्यामर छटाकान्तौ संहतौ चेति पर्यायाविति भरतः ॥ X
३७ । श्लो० । श्रितसदारामाभिः प्राप्यति जनो विहृतिमुदारामाभिः आरादारामाभस्फुरितस
रोजं सरस्तदारामाभिः ॥३८॥ श्रितसदारामाभिः प्राप्य इति जनः विहृतिं उदाराम् आभिः
आरात् आर आमा आभिस्फुरितसरोजं सरः तदारामाभिः ॥३८॥ श्रितेति जनः कामुकः श्रि
तलसदारामाभिः श्रित आश्रितो लसन् देदीप्यमान आरामो याभिस्तादृशीभिः आभि

न॰ रमन्भी रामाभिः स्त्रीभिः भैम्या सह उदारां श्रेष्ठां विहृतिं विहारं इत्यनेन प्रकारेण प्राप्य
३३ तदा तदानीं आरात् समीपे ऽभिस्फुरितसरोज अभि सर्वतः स्फुरितानि फुल्लानि सरोजा
लो॰ नि पद्मानि यस्मिन् तादृशं सरलतरांगं आरप्राप्तवान् भैम्या सह सभी च कासारः सरसी
टी॰ सरउत्तमरः ।३८। श्लो॰ किमपः सरसीमाया धाम गुणामृतप्रसरसीमायाः । कृतमिति
३४ सरसीमाया त्यक्तो भैम्या नलश्च सरसीमायात् ३९ । किं अपः सरसि इमाः या धाम गुणा
३५ मृतप्रसरसीमायाः कृतं इति सः रसी मायात्यक्तः भैम्या नलः च सरसीं आयात् ।३९। टी॰
किमप इति हे दमयन्ति त्वमिमा अपः जलानि किं गच्छसि विहर्तुमिति शेषः या त्वं गु
णामृतप्रसरसीमायाधामगुणाः पदामृतं तस्य प्रसरो विसर्पणं प्रवाहः आधिक्यं वा तस्य
या सीमा मर्यादा तस्याधाम गृहम् अत्र अमृतशब्देन यथा जलं चाभिधीयते गुणामृत
प्रवाहः तत्रैव स्थित इति भावः इत्येवमुक्त्वा स नलो रसी रसिकः मायात्यक्तो व्याजहीनो
ऽदम्भी भैम्या सह कृतं शीघ्रं सरसीं सरोऽगात् अगमत् विहर्तुमिति शेषः आपः स्त्रीभूम्नि
वार्वारि त्यक्तं हीनं विधुतं प्रमुक्तं तं धूतमुत्सृष्टमित्यमरः आगादिति याते र्लुङि ।३९।। ३५

श्लो॰॥ गतपङ्काः सारस्यश्रियोऽस्य जह्रुर्मनोऽधिकाः सारस्यः। अपि कोकाः सारस्यास्थिताः
कुरर्यश्च हंसिकाः सारस्यः। ४०। गतपङ्काः सारस्य श्रियः अस्य जह्रुः मनः अधिकाः सार
स्यः। अपि कोकाः सारस्य स्थिताः कुरर्यः च हंसिकाः सारस्यः। ४।। टी। गतेति सारस्यः
सरस इमाः सारस्यः सरः सम्बंधिन्यः श्रियः शोभाः कथम्भूताः गतः च्युतः पङ्को याभ्य
स्ता दृश्यः निर्मलाः अधिकाः श्रेष्ठाः यद्वा कानि जलानि अधिक्रम्य वर्तन्ते ताः सारस्य सा
रभूतस्य श्रेष्ठस्यास्य नलस्य मनो हृदयं जह्रुः हृतवत्यः सारस्यास्थिताः आरस्यत इत्यारसः
शब्देस्तस्य भाव आरस्यं आरस्येन सहितं सारस्यं तत्र स्थिताः कृतमधुरध्वनयः अथ वा
सर सस्य भावः सारस्यं तत्र स्थिता विद्योताः सारस्याज्जलसाहित्यात् वा स्थिताः कोकाश्च
क्रवाकाः कुरर्यः कुररपक्षिस्त्रियः हंसिका हंसस्त्रियः सारस्यः सारसानां स्त्रियोऽपि मनो
जह्रुः सरः सम्बंधिशोभादर्शनेन कोकादिदर्शनेन च मुमुदे इति तात्पर्य्यं पङ्कोऽस्त्री शाद
कर्दमौ सावावले स्थितेषा च कोकश्चक्रश्चक्रवाक इत्यमरः जह्रुरिति हृञो लिटि। ४०॥
श्लो॰। कान्तानि रक्तिमिताभिः स्फुटमङ्क्रि विहृतिरक्तिमिताभिः। आनतिरक्तिमिताभिः केसमयद

नै॰
लो॰
~~२४~~
२५
३५

शाङ्किः धृतिभिरक्तिभिताभिः ॥४॥ कान्तातिः अक्ति मिताभिः स्फुटं अङ्गिः विहृतिः अक्लिताभिः
अनातिनरक्तिभि ताभिः कं यत्य यत् अशाङ्कि धृतिभिः कक्तिमिताभिः ॥४॥ कान्तानीति अन
तिनरक्तिभि अत्यन्त नरो वलं रहो वा येषां ते ऽतितरमो न विद्यन्ते अतितरसक्तिमयो
मत्स्यविशेषा यस्मिन् तादृशं तिमिनक्रादिरहितं कन्नलमेत्य प्राप्य धृतिभि येर्यैरक्तिं
त्यागमिताभिस्त्यक्तधैर्याभिः यद्वा धैर्यं अक्तिमिताभिः अप्रगिताभिः चञ्चलाभिरित्य
र्थः ताभिः स्त्रीभिः अशाङ्कि शाङ्कितं अनर्केति पाठे विचारितं किमतर्कि नदाह यत् यस्मात्
अक्तिं देपरतां इताभिः प्राप्ताभिः नरद्भु दिमाभिरित्यर्थः मिताभि लेघुपरिमाणाभिरङ्गिः
स्फुटं प्रत्यक्षमियं विहृतिः क्रीडा अतः कान्तातिरक्तिन कापीत्यर्थः तिमिनक्रादिरहिते
सरसि तासां भयकारणं स्वभावभीरुतमेव राजीवः शकुलक्तिभिः नरसी बलं रहसी
कं शिरो वुना[illegible]ः शाकिभये इत्यस्य चित्रा स्तुडि ॥४॥ स्लो॰ अलिर्मिलत्परागतः
सरो रुहात्परागतः मुखं मुदापरागतस्तदीयमापरागतः ॥४॥ अलिः मिलत्परागतः स
रोरुहात् परागतः मुखं मुदा अपरागा अतः तदीयं आप रागतः ॥४॥टी॰ अलीति अलि

२४

भ्रमरो मिलत्परागतो मिलन् उल्लसन् परागः कुसुमरेणुर्यस्मिन् तादृशात् अस्मात्
सरोरुहात् कमलात् परागतः परावृत्तः पराक् संमुखे नदीयं स्त्रीगणास्संनिधिमुखे मुदा
हर्षेण रागतो ऽनुरागात् आप प्राप्तवान् सौरभाधिक्येन कमलं विहाय तन्मुखे प्रापि
स्त्रियदिति भावः ।४२। श्लो॰ अथकामानलिनीनांस्त्रीणां संचैर्मनोरमानलिनीनां
विधुरतमानलिनीनांपङ्क्तिर्विततानसंभ्रमानलिनीनां । ४३। अथ कामानलिनीनां
स्त्रीणांसंचैः मनोरमा नलिनीनां विधुरतमानलिनीनां पङ्क्ति विततान संभ्रमान् अलि
नीनां ।४३। अथेति अथानन्तरं कामानलिनीनां कन्दर्पानलयुक्तानां कामुकीनां नलि
नीनां नलयुक्तानां न[illegible]लः पतित्वेन अस्या अस्तीति नलप्रत्ययादिति प्रत्ययः ततो ङीप्
स्त्रीणांसंचैः समूहैः नलिनीनां कमलिनीनां पङ्क्तिः विधुततमा ऽत्यन्तं कम्पिता स्नानव
शात् पद्मावचयाद् वा मनोज्ञा सुन्दरी अलिनीनां भ्रमरीणां संभ्रमात्भयध्वनीन् ततान
नलसहिता रामा दोलिता कमलिनी भृङ्गी रुङ्कारान् अतनोदिति भावः ॥४३॥ श्लो॰
सरःश्रियो नारङ्गतःसरोजनलनारङ्गतः भयंमहन्नारङ्गतस्मान्नृजनलनारङ्गतः ।४४। सरःश्रि

न॰ यः अन्तरं गतः सरोजन्तरङ्गितः भयं महतं गतः तन्नूजनः तरङ्गितः ॥४४॥ सरइति
लो॰ सरः श्रियः सरो लक्ष्म्या अन्तरं मध्यं स्वरूपत्वं वा गतः श्रमैः तन्नूजनः स्त्रीसमूहः सरो
३५ जन्मान्तरं गतः सरोजा नां कमलानां अन्तरं नर्त्तनं तस्य रङ्गं तां रङ्गभूमेः तरङ्गितः ऊर्मिम
३६ हन्तरं अतिशयेन महद्भयं साध्वसं गतो गतवान् कमलनर्त्तनहेतुनरंगात् नक्रादति
36 कम्पशङ्कया स्त्रीजनो भीतो बभूवेति भावः अन्तरम् अवकाशावधिपरिधानान्तर्द्धिभेद
तादर्थ्ये छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि चेति लाञ्छनं च नर्त्तने इत्यमरः ॥४४॥
श्लो॰ अथ नीरात्सारसतः फेनपरीतात्सुधाम्बरात्सारसतः अतिमुखरात्सारसतस्त्रीरमि
तास्त्रीततिस्त्रिरात्सारसतः ॥४५॥ अथ नीरात् सारसतः फेनपरीतात् यथा अम्बरात्
half of the śloka is being omitted in the [illegible]
सारतः ॥४५॥ टी॰ अथेति अथ जलविहारानन्तरं सा स्त्रीततिः स्त्रीसमूह स्त्रिरात् बहुतर
णात् सारसतः सरसः इदं सारसं तादृशात् नीरात् जलात् तडागजलात् सारसः सरसः
इदं सारसं क्रीडनं तत्तद्विहाय ल्यब्लोपे पञ्चमी नीरात् कथम्भूतात् रसतः सारतः
अतिमुखरात् रसतः शब्दायमानात् सारसतः सारसपक्षिविशेषात् हेतोः अतिमुखरात् ३६

अतिवाचालात् फेनपरीतात् फेनव्याप्तात् नीरं तटं इता प्राप्ता उत्प्रेक्षते अम्बरात् आका
शात् यथा अम्बरादिवेत्यर्थः इवार्थे यथा आकाशपक्षे सारसतः सारसाणि श्रेष्ठानि संति न
क्षत्राणि यस्मिन् तादृशात् फेनपरीतं जलं नक्षत्रवदाकाशप्रायं यथा गगनतलादप्सरसो
ऽवतरंति एवं जलात् स्त्रियोऽवतेरुरिति भावः सत्ये साथो विद्यमाने प्रशस्तमप्यर्हितेपि
सत् व्योमपुष्करमम्बरम् सारो बले स्थिरांशे च इत्यमरः रसत इति रसशब्दः इत्यस्मात् शत्र
न्तः ॥५५॥ श्लो॰ । सचोदयावलीनतः समुत्प्रभावलीनतः नयन्ययावलीनतः पदं जनोव
लीनतः ।५६। सच उदयावलीनतः समन्तप्रभावलीनतः नयन् ययौ अलीन् अतः पदं
जनः वलीनतः ।५६। टी॰ सचोदयेति सच जनः स्त्रीसमूहः वलीनतस्त्रिवलीभिरानतः नम्रः
अलीन् भ्रमरान् नयन् गात्रादिसौगंध्येनाकर्षयन् अतः सवलीरात् पदं स्वस्थानं ययौ कथ
म्भूतं पदं उदयावलीनतः उदयाचलप्रायमात् यद्वा उदयं प्राप्य अवलीनात् निमग्नात् इन
तः सूर्यात् समन्तप्रभावलिः सम्यगुद्गताः प्रभावलयः प्रभाश्रेणयो यस्मिन् तादृशं सूर्य
ऽस्तमुपयाति स्त्रीजनो गृहं गतवानित्यर्थः पदं व्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुष्विति मेदिनीकरः
॥५६॥

नै॰ श्लो॰। दिश काममानंगेहमन्या मदनेषुविकृतिमानंगेहं इति परमानंगेहं नलः प्रियामन
लो॰ यदतिविमानंगेहं ।४७। दिश कामान् अङ्ग इहं मन्यः मदनेषुविकृतिमान् अङ्गे अहं ।
३६ इति परमानङ्गेहं नलः प्रियां अनयत् अतिविमानं गेहं ।४७। दिशेति हे अङ्ग प्रिये
३७ दमयन्ति अहं अङ्गे शरीरे मदनेषुविकृतिमान् कामशरविकारवानस्मि कथम्भूतः
37 इहंमन्यः इ कामं दहतीति इहः इहं काममहन्तारं आत्मानं मन्यते इहंमन्यः अतः कामा
नभिलाषान् दिश देहि इत्यभिलाषं पूरय इत्यनेन प्रकारेण नलः प्रियं गेहं गृहं अनय
त् अनैषीत् कथम्भूतं गेहं परमानङ्गेहं परमा उत्कृष्टा अनङ्गस्य कन्दर्पस्य ईहा चेष्टा
वाञ्छा वा यस्मिन् भित्तिलिखितनानाकामचेष्टं कामोद्दीपनं वा अतिविमानं अतिक्रान्तं
विमानं पुष्पकादि येन तत् निरस्तदेवयानमित्यर्थः अनयदिति णीञ्प्रापणे लङ्। ।४७।।
श्लो॰ अरुणामहस्तेनेन प्रापि च सोऽङ्गैर्गुणाग्रहस्तेनेन भावमिहस्तेनेन स्फुटमस्य हि
तद्गतेंशुहस्तेनेन ।४८ अरुणामहस्तेनेन प्रापि च सः अङ्गैः गुणाग्रहः तेनेन। भावं
इहस्तेनेन स्फुटम् अस्य हि तद्गते अंशुहस्ते अनेन ।४८। अरुणेति। इनेन रविणा अरु ३६

णेन जनस्त्वं प्रापि प्राप्ता संध्यारागग्रहणो रविप्रभृत स च गुणग्रहो गुणग्रहणं अङ्गैः क
मलैः नैतेनैन विस्तारितः इह संध्याक्षणमेव अस्य हि सूर्यस्य नष्टे ते कमलगते अंशुहस्ते
किरणहस्ते सति अनेन रविणा स्तेनेन चौरेण स्फुटं व्यक्तं भाष्यम् संध्यारागग्रहणे सूर्ये
कमलानाम् आहरणेऽप न अभूत् यतः कमलगते रविकरे सति सायंकाले स्वकरस्थोण त
दूरकान्तो रविरपहर्तुमिष्यतीति भावः महस्त्राद्भवनजन्मासीरिति नेन नैनोनेर्लिटि ४८।
यतो यतो यतो यतो रवेर्मरीचिसञ्चयः महान्धकारसञ्चयस्ततस्ततस्ततस्ततः
यतः यतो यतो यतो रवेः मरीचिसञ्चयः महान्धकारसञ्चयः ततस् ततस्तत ततस्।
॥४९॥ यत इति यतो यस्माद्धेतो रवे मरीचि संचयो रविकिरणसमूहः यतो यतो यस्मा
द् यस्मात् स्थानात् यत उपरतः यमु उपरमे धातोः रूपम् ततस्तस्माद्धेतोः ततस्ततः तत्र
तत्र महान्धकारसञ्चयो महान्धकारसमूहः ततः व्याप्तः यतो यतो देशाद् रविकिरणा
निवृत्ताः तत्र तत्र महान्धकारो व्यापदिति भावः ॥ ४९ ॥ छादितरविताननेन प्रापि च कालेन
सस्वरविताननेन जितहधिरविताननेन व्योम्ना चमत्कृतं उडुभिः अविताननेन ॥ ५० ॥

न॰
लो॰
३७
३८
38

छादितरविना अनेन आपि च कालेन सखरवितानेन । जितरुचिरवितानेन व्योम्ना
च स्फुरितं उडुभिः अवितानेन ।५१। छादितेति अनेन कालेन सायंकालेन छादि
तरविना आच्छादितः पिहितो रवि र्यस्मिन् सः तस्य भावस्तेना सा प्रापि आप्ता कथ
कम्भूतेन सखरवितानेन सखराः सशाखाः वीनां पक्षिणां नाना विस्तार यस्मिन् तादृ
शेन सशाखपक्षिसमूहविशिष्टेनेत्यर्थः एवं जितरुधिरवितानेन जितरुधिरसमूहेन
अत्यन्तमारक्तेनेत्यर्थः एवं अवितानेन अवीनां मेषाणां वितानो विस्तारो यस्मिन् तेन
यद्वा न विद्यते वितानो यज्ञो यस्मिन् तेन संध्यायां यज्ञं वर्जयेदिति स्मृतेः पुन व्योम्ना
आकाशेन उडुभिः करणेन स्फुरितं शोभितम् यद्वा जितरुचिरवितानेनेति पाठे व्योम्ना
इत्यस्य विशेषणं जितः अतिरुचिरो वितान उल्लोचो येन इत्यर्थः क्रतुविस्तारयोरस्त्री
वितानं त्रिषु तुच्छके नारकापुंड्रवासियामित्यमरः ।५। श्लो॰ अथोद्यतेन मुराजितः श्रियं
स्वमाप राजितः यथायतो मराजित स्मराग्रगः सराजितः ।५२। अथ उद्यतः अमुराजितः
श्रियं स्वं आप राजितः यथायतः मराज्यत स्मराग्रगः सराजितः ।५२।। टी॰ अथेति अथा

३८

तन्नं अम्बुराजत उदधेः सकाशात् उद्यतः उद्गतः सचंद्रो व्यराजत शुशुभे खं आकाशं
राजतः चन्द्रात् श्रियमाप प्राप यथा शाङ्गवार्धि उदधेरुत्थितश्चन्द्रो मदनभूपप्रस्थानाभि
षेकरूप्यकलशइव रराजेति तात्पर्य्यम् श्वेतरूपेति रजतं हेम्नि रूप्ये सिते त्रिषु व्यराजत
ति राजेर्लङि ।५१। श्लो॰ ।। दधतं कालं कालं कालं कालं वियोगिनी शशिनं तं । अध्वका
लं कालं कालं कालं प्रसमीक्ष्यतमप्रापयन्त ।५२। दधतं कालं कालंकालंकालं वियोगिनी
शशिनं तं अध्वगकालं कालंकालं का अलं प्रसमीक्ष्यतं प्रापयन्त ।५२। दधतमिति का वियो
गिनी विरहिणी तं शशिनं प्रसमीक्ष्य तं दृष्ट्वा अलं समर्था न काऽपीत्यर्थः कथम्भूतं कालं कृ
ष्णवर्णं यत् कालं कालंकालं कलङ्कः एव कालङ्कः सचासौ अलङ्कालो ऽलङ्कारो रलयोरै
क्यात् यमके न दोषः तं दधतं धारयन्तम् अध्वगकालं अध्वगानां पथिकानां नाशकम् एवं
कालं कालंकालं कालं काले रात्रौ रात्रौ प्रापयन्त प्रकर्षेणाघयन्त कृष्णो नीलासितश्यामका
ल श्यामलमेचकाः कालंकालमिति नित्यवीप्सयोरिति द्विर्वचनम् कालाध्वनोरत्यन्तसं
योगे इति द्वितीया ।५२। श्लो॰ तरत्तुषारशीकराः प्रबुद्धकैरवाकराः ततोज्ज्वलाभिरकराः

न॰ लो॰ ३८ २८ ३२

जगत्सु शार्वरीकराः ।५३। त्वरन्तुषारशीकराः प्रवुद्धकैरवाकराः ततः जजृम्भिरे
कराः जगत्सु शार्वरीकराः ।५३। तत इति ततोऽनन्तरं त्वरन्तुषारशीकराः त्वरन्तः स्र
वन्तः तुषारशीकराः तुहिनजलकणा येभ्यस्तादृशाः एवं प्रवुद्ध उत्फुल्लः कैरवाकरः
कुमुदसमूहो येभ्यस्तादृशाः शार्वरीकराः चन्द्रसम्बन्धिनः शार्वरीकरस्तु चन्द्रः तस्येद
मित्यण् कराः किरणा जगत्सु लोकेषु जजृम्भिरे विजृम्भिताः बलिभागांशवः कराः जजृ
म्भिरे इति जृम्भिर्विनामे विकाशे चेत्यस्मा लिटि ।५३। श्लो॰ वधूस्तदानुनिन्यिरे नयेनये
नये नये वशं नरो नयन्त्समुन्नते नते नते नते ।५४। वधूः तदा अनुनिन्यिरे नयेन येन
येन ये वशं नरः अनयन् समुन्नते तेन तेन ते ।५४। टी॰ वध्विति तदा चन्द्ररश्मिप्रा
तानन्तरं ये नरा ये पुरुषाः येन येन नयेन यया यया नीत्या उपायेन वधूः कामिनी
रनुनिन्यिरेऽनुनीतवन्तः ते पुरुषाः समुन्नतेन समृद्धेन तेन तेनोपायेन वशं स्वाधी
नतां अनयन् अनैषुः येन येनोपायेन पादानत्या स्त्रियोऽवशा वशमागताः तेनैव
वशं चक्रुरिति भावः ।५४। श्लो॰ सहासहावमार्दवैः सहासहाः स्मरस्य ते । सरा ३८

स्मरा यथामृते स्मरा स्मरागमाद्युः ॥५४॥ सहासहावं आदैः सह असहाः स्मरस्य ते स्मरा
स्मराः यथा अमृते स्मरास्मरागं आदयुः ॥५५॥ सेहति स्मरस्य कामस्य असहा असहि
ष्णाव से कामुकजनाः सहासहावं हासभावादिभावसहितं यथा स्यादेवं आदैः सह सादर
स्मराः मधुषु रागं पानानान्तरागमाद्यु ईदृशे अनंतरं कामुजनाः हावादिसहितं स्मरां प
पुरिति भावः यथा स्मरा स्मरा देवास्मरा अमृते रागं कुर्वंति स्वराहलिप्रियाहालापविस्तुह
स्मराणामजाः आद्युरिति दधेनर्लिटि यद्योक्तं ~~अनेन~~ अलंकारस्तभावस्ते ज्ञेयाभावारमा
श्रयाः यौवनेभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः देहात्मकं भवेत् सत्वं सत्वाद्भावः समु
त्थितः भावात् समुत्थितो हावो हावाद्धेला समुत्थिता लीला विलासो विच्छित्ति विभ्रमः
किलकिञ्चितम् मोट्टायितं कुट्टमितं विब्बोको ललितं तथा विहृतं चेति विज्ञेया दश स्त्री
णां स्वभावजाः प्रियस्यानुकृति लीला श्लिष्टा वाग्वेषचेष्टितैः विलासोतिविशेषोक्ति प्रि
याया वासनादिषु मण्डना च्छादनमाना सा विच्छित्ती तु पदर्शितः चित्तवृत्त्यनवस्थानं शृङ्गा
राद् विभ्रमोमतः हर्षाद्रुदितगीतात्रासमिश्रं किलकिञ्चितम् मोट्टायितं प्रियं स्मृत्वा सांग

नः
लो॰
टी॰
...
पं॰
40

भङ्गादिजृम्भणाम् । दुःखोपचारः सौख्येपि हर्षात् क्रुद्ध मिते मते विशेषाभिमतश्चा
स्त्रावपि गर्वादनादरः अनाचार्योपदिष्टं स्यात् ललितं रतिचेष्टितम् । वक्तव्यभाषणा
द्व्याजात् विकृतं दर्शितं गितम् ॥५५॥ श्लो॰ मधु प्रपीय चाभवन्नता नता नता नताः
रमा रमा रमा रमाकुले जनेत्र हालया ।५६। मधुप्रपीय च अभवन् नतानताः न
ताः न ताः रमा अरं आर मारमाकुले जने अत्र हालया ।५६॥ टी॰ मधिवति मधु
प्रपीय मधु मद्यं प्रपीय पीत्वा तास्ताः स्त्रियः नता नम्रा अनता अनम्राश्च नाभवन्
अपितु अभवन् या याः पूर्वं नम्राः तास्ता मधुपाने कृतेऽनम्रा अभवन् याया अन
म्रास्तास्ता मधुपानेकृते नम्रा अभवन् मारमाकुले मारः कन्दर्पस्तस्य मा लक्ष्मीः
कन्दर्पशोभा तया आकुलेऽत्र जने हालया सुरया करणेन रमा श्रीः अरं शीघ्रमेव
आर प्राप्तवती सुरापानात् स्त्रीजनेऽस्येव काचन शोभा अभूदिति तात्पर्य्यम् । प्रपी
येति पीङ् पानेस्य रूपं पिबतेस्तु प्रपायेति भवितव्यम् अभवन्निति भवतेर्लङि आ
रेति अर्तेर्लिटि मधु मद्ये मधु क्षौद्रे मधु पुष्परसे विदुः यद्वा पूर्वश्लोको कालेकामि

श्रीः

जनाश्च पुनः मधु आसवं प्रपीय पीत्वा अतानतानतानताः अभवन् अतानं अन्तर
शून्यं यत्तानं गानमूर्च्छनविशेषः तस्य भावस्तत्ता तस्यां अनताः परायणाः मधुं पीत्वा
गानोत्सुका अभवन्नित्यर्थः अत्र वसन्ते जने कामिजने अथवा अत्र जने अस्मिन् कामिजने
हालया मदिरया आकुले मत्ते सति रमा शोभा मारं कामं अरं अत्यर्थं आर प्राप मदिरापा
नेन कामो विजृम्भित इत्यर्थः ।५६। श्लो॰ भ्रमरैर्द्रागसत्तानि प्रपीय च मधूनि सानुरा
गत्तानि दत्तनिरागसत्तानि प्रापच्छयनञ्च नतस्वरागसत्तानि ।५७। भ्रमरैः द्राग् अ सत्तानि प्र
पीय च मधूनि सानुरागः तानि ।५७। टी॰ भ्रमरैरिति सानुरागः सस्नेहः एवं तरागः त
रया वेगेन गच्छतीति तरागः जनः कामुकलोके दत्तनिरागसत्ता निरपराधता येन ता
दृशानि विस्तारितापराधानि भ्रमरैः भृङ्गैः अस्पृष्टकोपरिशिष्टानि द्राक् झटिति असत्तानि तत्ता
नि मधूनि मद्यानि प्रपीय पीत्वा शयनं पर्यङ्कस्य प्रापत् अधिशिश्रियत् कीदृशं शयनम्
नतानि तानो विस्तारो वितानो वा अस्यास्तीति तानि ५७। श्लो॰ सरससुरमहेलाभिस्तु
रितगुणाभिस्ततः स्मरमेहलाभि। श्रीः प्रवरमहेलाभिः तथा एव युवपंक्तिभिः परमहेला
भिः ।५८।

न॰ लो॰ टी॰ ध॰ ५१

ससमुद्रमहेलाभिस्फुरितगुणाभिः ततः स्मरमहे अलाभि । श्रीः प्रवरमहेलाभिः तथा एव
युवपङ्क्तिभिः परमहेलाभिः ।५८। ससेति ततोनन्तरं ससमुद्रमहेलाभिस्फुरितगुणाभिः
ससमुद्रा समागरा महती दीर्घा या इलाभूमिस्तस्या अभिस्फुरिताः प्रसृताः गुणा यासां ता
भिः परमहेलाभिः परमा उत्कृष्टा हेला लीला यासां ताभिः प्रवरमहेलाभिः प्रचुरस्त्रीभिः स्म
रमहे कंदर्पोत्सवे श्रीः शोभा सर्वं वा अलाभि प्राप्ता तथैव तेन प्रकारेण युवपङ्क्तिभिः तरु
णश्रेणिभिः श्रीः प्राप्ता यद्वा ताभिः करणेन सह वा युवपङ्क्तिभिः शोभा प्राप्ता उभयत्रापि
विशेषणम् अलाभीति डुलभष् प्राप्तौ इत्यस्य लुङि चिण् भावकर्मणोरिति च्लेश्चिणि
कृते लभेश्चेति नित्यं नुमि प्रसक्ते विभाषा चिण्णमुलोरिति नुमागमाभाव वृद्धौ रूपम्
महती इला महेला गोभूवाचस्त्विलाः महेला महिलायिचेति विश्वकोशः ।५८। श्लो॰
तया ईद्धधीरमायया मुदा मनोरमायया नलो विहारमाययावधः कृता रमायया ५९ ॥
तया आर्द्रधीः अमायया मुदा अनारमायया नलः विहारम् आययौ अधःकृता रमा य
या ।५९। तयेति आर्द्रधीः शृङ्गाररस्निग्धबुद्धि नलो मुदा हर्षेण अनारमायया आरेमा

विरतिस्तद्रहितः अनारमः अयः शुभावहो विधिर्यस्यास्तादृश्या हर्षाविरतभाग्ययेत्य
र्थः अमायेया मायारहितया तया दमयन्त्या सहितो नलो विहारं क्रीडां आययौ आगमत
यद्वा या दमयन्ती मुदां हर्षाणां अनारमाय अविश्रामाय भवति तया सह नलो विहारं
आययौ यया रमा लक्ष्मीरधः कृता रूपेण सौभाग्येन वा लक्ष्मीतोप्यधिका तादृश्या दम
यन्त्या नलो विजहारेति भावः आययाविति यतेर्लिटि ॥ ५९ ॥ श्लो॰ साशंकामायासीत्कृ
तिनी भैमी नलस्य कामायासीत् कामनिकामायासीद्द्युतिं तद्दिष्टः स चाधिकामायासीत्
६० ॥ ~~इति नानामायानो नलः कलिभुवो बलेन नानामायानां ॥ यमनानां आयानात्~~
सा अशंका अमाया आसीत कृतिनी भैमी नलस्य कामाय आसीत् कामानिकामाया स्य
सी द्युतिं तद्दिष्टः सः च अधिकां आयासीत् ६० ॥ टी॰ साशंकेति सा भैमी अशंका शंका
रहिता कृतिनी निपुणा पुण्यवती वा अमाया निर्व्याजा आसीत् अभूदित्यनेन प्रकारे
ण नलस्य कामाय अभिलाषाय आसीत् उज्जगाम नलकामम् अपूपूरदित्यर्थः
कामनिकामायी कामेन मन्मथेन निकामं अत्यर्थं आयासी आयासः परिश्रमो यस्य

न॰ लै॰ ५२
52

तादृक् सच नलस्य तद्दिष्टा दमयन्तीप्सिता अधिकां द्युतिं क्रीडां आयासीत् आगतः द
मयन्ती रतावसरे निर्व्याजाशङ्का नलस्याभिलाषाय बभूव नलस्य दमयन्ती मनोभिलाषि
तं सम्पूरयेदिति परस्परमोत्कर्षो ऽभूदिति भावः आसीदित्यस्योरेकं लङि अपरमपि
असमगताविव्यस्य लङि आयासीदिति यातेर्लुङि यद्वा भैमी कथम्भूता साशङ्का सभया
प्रौढत्वाभावात् स्त्रीस्वभावत्वाच्च पुनः अमाया निःकपटा पुनः सीत्कृतिनी सीत्कारवती ।
यद्वा साशङ्का मायासीत्कृतिनीत्येकं विशेषणं आशंकामर्दिता यामाया कामकेन तया
सीत्कृतिनी भयच्छलेन सीत्कारवती यद्वा मायया छलेन सीत्कृतिनी नलस्य कामायमनो
रथसिद्धौ आसीत् बभूवेत्यर्थः ६० ॥ श्लो॰ ॥ इतिनानामायानांनलःकलिभुवांबलेननाना
मायानां । वासनानामायानान्निधिररमद्राज्यजन्मनामायानां । ६१ इति नानामायानां
नलः कलिभुवां बलेन नानामायानां वासनानां आयानात् निधिः अरमत् राज्यजन्मनां
आयानां । ६१ । इतीति इत्यनेन प्रकारेण नलो नैषधः नानामानां नानाविधामायावा स्या
जानि येषु तादृशानां कलिभुवां कले भवन्तीति कलिभुवः कलिजनितास्ते वासनानां

५२

म विपदो आयानात् आगान्पर्यन्तं आगमनावधेः अरमत् अक्रीडत् कम्भूतः बलेन करेणन य
राज्यजन्मनां राज्ये जनपदे जन्म येषां तादृशानां आयानां धनागमानां निधिर्निधानमाधार
इतियावत् अभवदिति पाठे नानादम्भकलिजनितापत्यागमनावधि नलो राज्यश्रीभाजन
म् अभूदिति भावः अयः शुभावहो विधिः अभवदिति भवतेर्लङि ॥ ६१ ॥ श्लो स्वयंवरादनन
रं मही मही मही नधीः ररक्ष नैषधस्तदा रराजराजराजराः ॥ ६२ ॥ स्वयंवरादनन्तरं मही
महीं अहीनधीः ररक्ष नैषधः तदा रराज राजराजराः ।६२। टी० । स्वयमिति तदा तस्मिन् का
ले नैषधो नलः स्वयंवरात् अनंतरं स्वयंवरात् परतः महीम्भुवं ररक्ष अपालयत् कीदृशः
महीमोत्सवः पुनः अहीनधीः विशालबुद्धिः राजराजराः राजराजः कुबेरस्तस्येव राः धनं
यस्य तादृशः सन् रराज शुशुभे स्वयंवरोत्तरं भुवमरक्षत् नलः कुबेरप्रायसम्पच्चासीदिति
भावः राजराजो धनाधिपः अर्थैरैविभवा अपीत्यमरः रराजेति राजतेर्लिटि ॥ ६२ ॥

इति बोधिनीटीकासहिते श्रीकालिदासकृते
नलोदये सत्कावे द्वितीयोच्छ्वासः ॥२॥

न:

४३

43.

४३

अथ स्वरहृषभाः स्वरतः प्रेत्य कलिं प्रस्थिता महाह्लास्वरतः यः कृतिषु शुभास्वरतः पप्रच्छुस्तद्गतिं च ननिभा स्वरतः ॥१॥ अथ सरहृषभाः स्वर अतः प्रेत्य कलिं प्रस्थिताः महात् भास्वरतः यः कृतिषु शुभास्स्वरतः पप्रच्छुः तद्गतिं च ननिभाः स्वरतः ॥२॥ टी॰ अथेति अथ स्वयंवरादनन्तरं अनोस्मात् भास्वरतो देदीप्यमानात् महात्स्वयंवरोत्सवात् स्वः स्वर्गं प्रस्थिताः प्रचलिताः स्वरहृषभाः सरोत्तमा इन्द्राद्याः कलिं प्रेत्य तद्गतिं तस्य कलेर्गतिं गमनं पप्रच्छुः यः कलिः शुभास्त कृतिषु कार्येषु अरतः न रतः विरक्त इति यावत् कीदृशाः सरोत्तमाः स्वरतः कण्ठध्वनेः च ननिभाः घनो मेघः तत् सन्निभाः कलिविशेषणं वा दमयन्तीस्वयंवरात् स्वर्गं गच्छन्तो देवा पथिमध्ये कलिं दृष्ट्वा कुत्र गच्छसीति तद्गमनं पृष्टवन्त इति भावः स्वरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः मह उद्धव उत्सव इत्यमरः पप्रच्छुरिति प्रच्छ धातोर्लिटि ॥१॥ श्लो॰ यशास्त्रमायामितयाहृतः श्रिया भीमदुहितृमायामितया तदधिगमायामितया स्पृहयाद्य मनुष्यमायामितया ॥२॥ यशास्त्रमायामितया हृतः श्रिया भीमदुहितृमायाइतया तदधिगमाय अमितया स्पृहया अद्य मनुष्य

न॰
लो॰
टी॰
४४

आयामि तया ।२। टी॰। यशासामिति दैवे गमनं पृष्टः कलिराह यशासा आयामितया
कीर्तीनां दैर्घ्यवत्तया अतियशस्विन्या इत्यन्वयात् नल भीमदुहितृमायां भीमस्य राज्ञो
दुहिता पुत्री दमयन्ती तन्मायां तद्व्याजं इतया तया श्रिया लक्ष्म्या हृतः गतया आ
हृतचित्तः तदधिगमाय दमयन्ती रूपलक्ष्मीलब्धये ऽमितया ऽसंख्यया बहुतरया
स्पृहया इच्छया अद्य अस्मिन् वर्तमानदिने मनुष्यलोकमायामि गच्छामि आत्मजस्त
नयः सूनुः सुतः पुत्रः श्रियान्वमी आदुर्दुहितरं मर्त्ये इत्यमरः आयामीति यातेर्लटि ॥२॥
श्लो॰। इति विकलोमायायास्तदुक्तऊचजनोऽमलोमायायाः शुभशीलोमायायाः स्थि
तोनलोऽस्यावरोऽनलोमायायाः ॥३॥ इति विकलः मायायाः तदुक्तः ऊचे जनः अमलः
मा यायाः शुभशीलः अमायायाः स्थितः नलः अस्याः वरः अनलोमायायाः ।३। टी॰ इतीति
इत्यनेन प्रकारेण तदुक्तस्तेन कलिनोक्तो भाषितः अमलो निर्मलः अमरो वा रलयोरैक्यात्
जनो देवलोक ऊचे ऽकथयत् किं अकथयत् इत्याह अमायाय निर्व्याजायाः अस्याः दम
यन्त्याः शुभशीलः उत्तमस्वभावो नलः वरः स्थितः वरः प्रसिद्धः कीदृश्याः विकलोमाया ४४

या: विकलो दीनः उमायाः पार्वत्या अयः शुभावहो विधिर्यया तादृश्याः पार्वत्युत्तमभाग्यायाः
कीदृश्याः अनुलोमायायाः अनुलोमः अनुकूल अयः शुभादृष्टं यस्याः तस्याः मा यायाः मा गच्छ
इमयन्त्या नलो हतस्त्वं मागच्छेति भावः यद्वा मायाया दम्भतः बुद्धितो वा विकलः सन् त्वं
मागच्छेत्यर्थः यद्वा देवलोकविशेषणाम् मायायाश्चरीरूपा दम्भो बुद्धिश्चेति हेमः ४॥
श्लो॰ वच इति वस्वादिभ्यः श्रुत्वा कलिरुत्सवामसवस्वादिभ्यः मखसर्वस्वादिभ्यस्तु को
पदोषात् समदभुवः स्वादिभ्यः ।५। वचः इति वस्वादिभ्यः श्रुत्वा कलिः उत्सवामसवस्वादिभ्यः
मखसर्वस्वादिभ्यः चुकोपदोषात् सः मदभुवः स्वात् इभ्यः ।५। टी॰ वचइति स कलिरु
त्सवामसवस्वादिभ्यः उत्सवलक्षणो य आसवो मधु तत्स्वादिभ्यः पीतवद्भ्यः मखसर्वस्वादि
भ्यः मखस्य यज्ञस्य सर्वस्वं यज्ञधनं सोममतं प्रीतं येषां ते तादृग्भ्यो वस्वादिभ्य इन्द्रादिदेव
भ्यः इत्युक्तप्रकारं वचः वचनं श्रुत्वा मदभुवः मदात् दर्पात् भवतीति मदभूः तस्मादिति
दोषविशेषणं स्वात् स्वकीयाद् दोषाद् दूषणाच्च चुकोपकुद्धो ऽभूत् कलिः कस्मात्
इभ्यः आढ्यः मघवासवो माघवकः समस्तस्तत्रस्मरवः कारः कुप कोपे अस्माल्लिटि स्वं ता

न॰ लो॰ टी॰ ५५ 55

ताबात्मनि स्वच्छिद्राश्राश्रात्मीये स्वोत्सीयां धेवे इभ्य आढ्यो धनी स्वामी त्वम्रः ।४। श्लो॰ प्रबल
तमानबलतयासंयोज्य नले हृतोत्तमानवलतया तेनामानवलतया तरुणेव तयाश्यतां न मान
वलतया ॥५॥ प्रबलतमान् अबलतया संयोज्य नले हृतोत्तमान् अवलेन या, तेन अमा
नवलतया तरुणाइव तया आश्यतां न मानवलतया ।५। टी॰ प्रबलेति या दमयंती हृ
तोत्तमान् देवश्रेष्ठान् प्रबलतमान् उत्कृष्टबलान् अबलतया अबलत्वेन संयोज्य विगण
य्य मानबलतया अहंकारसामर्थ्येन नलेऽबलत नलेऽन्वरज्यत यद्वा तया किम्भूतया
किम्भूतया मानवलतया मनःष्वरतया इलयारक्तैन् तया दमयन्त्या तेन नलेन अमा स
ह न आश्यतां न स्वीयताम् कया केनेव नवलतया नवीनव्रततया तरुणेव हृतेणेव
या दमयन्ती देवान् असमर्थान् ज्ञात्वा नलं अवरिष्ट सा नलेन सह वियुज्यतमिति भाषा
पेति भावः यद्वा प्रबलतमान् देवान् संयोज्य स्वयंवरमानाय्याबलतया स्त्रीत्वेन नले या
अनुरक्तेत्यर्थः अबला या भावोऽबलता त्वतलोर्गुणवचनस्येति पुंवद्भावः यथा लता
स्वरहृत्तान् अबलतया अमारत्वेन संयोज्य नले तत्कृतरेण बल्यते पश्चात्तेन सह तया
क्षणमपि न स्वीयेत तथेत्यर्थः लतया कथम्भूतया मानबलतया मोनविस्तारे बलता ५५

अतिशयो यस्यास्तयेतिभावः अमांसह समीपे च आस्यतामित्यास उपवेशन इत्यस्य भावे
लोट्।५॥ श्लो॰ इति बलवानन्तरतः कलिः किलैतज्जगाद वानन्तरतः। अवहितवान
न्तरतः समृद्धिषु नलस्य विविशिवानन्तरतः।६। इति बलवान् अन्तरतः कलिः किल
एतत् जगाद वाने नरतः अवहितवान् अन्तर् अतः समृद्धिषु नलस्य विविशिवान् अन्तरतः ६।
टी॰। इतीति इत्यनेन प्रकारेण बलवान् कलिरेतत् पूर्वोक्तं शापवचनं जगाद किल
निश्चये अतः अनन्तरं अन्तरतः छिद्रतः छिद्रं अवकाशं वा प्राप्य ल्यब्लोपे पञ्चमी यद्वा अन्त
रतः अन्तर्द्धानात् समृद्धिषु सम्पत्सु सत्सु तद्वृद्धिष्विति पाठे पूर्वोक्तशापवचनवृद्धिषु
इत्यर्थः अवहितावान् सावधानः वाने समूहे नरतो गच्छतो नलस्यान्तः हृदयं विविशिवा
न् प्रविवेश यद्वा अन्तरतद्वृद्धिषु इति पाठे अवकाशशापदुःखबाहुल्येषु अवहितवान्
सावधानः यद्वान्तरं विनाशं नेनीति अन्तरतत् तादृशा हृदयः नलस्य श्रद्धया धना
गमान्तेषु यद्वा अन्तरतद्वृद्धिषु अन्तरच्छिद्रं तद्वृद्धिषु छिद्रबाहुल्येषु सावधानः अथ
वानन्तरवृद्द्वृद्धिषु अन्तरे मध्ये तद्वृद्धिषु तस्य नलस्य वृद्धिषु धनागमेषु अवहितवान्

नै॰ लो॰ ५८ यथा वृद्धिर्न भवतीति पुनरन्तरतः नाशारतः एवं पूर्वोक्तं शापवचनं कलिरुक्तवान् ।
प्रवेशच्छिद्रान्वेषणसावधानस्य मृगयागतस्य नलस्य हृदयमध्यास्तेति भावः अन्तर
मवकाशावधिपरिधानान्तर्द्धिभेदाताद्दर्थ्येषु छिद्रात्मीयविनावहिरवसरमध्येन्तरात्म
नि च अन्तोऽध्यवसितो मृत्यौ स्वरूपे निश्चयेऽन्तिके वानमिति तस्य समूह इत्यण् विश
प्रवेशने इत्यस्माल्लिटि कसौ कृते विभाषागमहनविदविशामिति वसोरिट्विकल्पः ॥
॥८॥ श्लो॰ सोऽयमदारोदरतः पुष्करविजितो नलः सदारोदरः । आजाद्दारोदरतः स्वपु
रान्निर्यातवान् उदारोदरतः ॥ ७॥ सः अयं सदा रोदरतः पुष्करविजितः नलः सदारः
दरतः आजात् दारोदरतः स्वपुरात् निर्यातवान् उदारोदरतः ॥७॥ सोऽयमिति अयं क
लिप्रवेशानन्तरं दारोदरतः द्यूतसम्बन्धिनो आजात् कपटात् पुष्करेण भ्रात्रा विजितः
पराजितः सनलः दरतः भयात् पीडया वा उदारोदरतः उदरं विशालम् उदरं मध्य
यस्य तादृशात् स्वरात् स्वगृहात् नगराद्वा सदारः दारा दमयन्ती तया सहितो नि
र्यातवान् निरगमत् यद्वा राज्यभ्रंसानन्तरं कलिसंक्रमणात् नलस्य जलोदरं जात ५८

मिति पुराणवार्त्ता वृहद्रुद्रहिमोतिरित्यर्थः कीदृशः सदा सर्वदा रोदे अस्तुनवणे रतो-
ऽनुरक्तः रुदन्निति यावत् दरोदरदुरोदरे इति वैजयन्ती तस्मैदमित्यमरः पञ्चम्यामस्मि-
न् अगारे नगरे पुरः दशास्त्रियाममेयस्वभे उदारो दाता महतोरित्यमरः ॥७॥ श्लो॥
शुचमकरोदन्यस्य भ्रमन्नलः पथि पदे सरोदन्नयस्य नच पुनरोदन्यस्य त्राणायाभूत् पर
मरोदन्यस्य ।८। शुचम् अकरोत् अन्यस्य भ्रमन् नलः पथि पदे सरोदं नयस्य । नच पुनः
अरोदन्यस्य त्राणाय अभूत् परं परोदन्यस्य ।८।१। टी॰। शुचमिति पथि मार्गे सरोदं रोदनं
रोदस्तेन सहितं साश्रुः यद्वा स नलः रुदन् रोदनं कुर्वन् पदं चरणं विन्यस्य निक्षिप्य भ्र
मन् अटन् अन्यस्य प्रेक्षकस्य पुष्करस्य वा शुचं शोकमकरोत् अकार्षीत् पुनः अस्य न
लस्य परोदन्यस्य परा उदन्या पिपासा यस्य तादृशस्य अरोदन्यस्य अरोदनार्हस्य परमन्यदन्न
जलादिनात्राणाय रक्षणाय नाभूत् नाभवत् नलः कण्टकवति मार्गे कोमलचरणतया
रुदन् परिभ्रमन् सर्वेषां शोकं अकरोत् दुःखितस्यास्य रक्षणाय कोपि नभूत् निराहा
र एवासीदित्यर्थः मनुष्यशोको न भक्त् स्त्रियां पदं अवसित त्राणस्थान लक्षसाद्विवलख

नं· लौ· टी· ४७ 47

उदन्येति तर्हितीति या अशाना बुभुक्षा क्षुद् ग्रासस्तु कवलार्थकः उदन्या तु पिपासा
तद् ऽस्मरः अभूदिति भुवोलुङि ।८। श्लो॰ नास्य रमानावासमस्तच्च खगाजहुरर्थ्यमा
नावासः अपिमदमानावास स्वरोषजलधिन्तरन्नुत्तमानावासः ।९। तस्य रमा न आ
वासः तत च खगाः जहुः अर्थ्यमानाः वासः । अपि मदमानौ आस स्वरोषजलधिं तरन्
उत्तमानावा सः ॥९॥ टी। नास्येति अस्य नलस्य रमा लक्ष्मी र्न आवासो गृहं आच्छादने
वा आसीदित्यध्याहारः तच्चावासः तस्य वस्त्रं अर्थ्यमाना क्रीडार्थं आहरेति दमयन्त्या
याच्यमानाः खगाः कलिमायाविर्भूता हंसा जहुः दमयन्ती परिहितवस्त्रैकदेशं परि
धाय हंसजिघृक्षया स्ववस्त्रं तदुपरि क्षिप्तं तद् वस्त्रं गृहीत्वा हंसा ययुः इति पुराणवा
र्ता स नलः उत्तमानावा शांतिनौकया स्वरोषजलधिं स्वक्रोधसमुद्रं तरन् उल्लंघयन् मदं
गर्वं मानमभिमानं च आस चिक्षेप लक्ष्मीः स्थलं वास्य नासीत् कुत्रापि न स्थितवानित्यर्थः
पथि च तद् वासो गृहीता पत्त्रिणो गताः असौ च गर्वाभिमानावत्याक्षीत् आसेत्यसहो
पश्च इत्यस्य लिटि ।९। श्लो॰॥ नापशतेनवमानो द्रवेदितीमौनगाह्वेतनवमानौ ॥

चेलान्तेनवसानौ चेरतुरेकेन पर्वतेनवसानौ ।११। तापशान्तेन वसानौ इवेत् इति इमौ
नगाहृते अनवसानौ । चेलान्तेन वसानौ चेरतुः एकेन पर्वते नवसानौ ।।११ टी। ताप
ति इमौ दमयन्तीनलौ तापशान्तेन तापाधिकेन नौ अवयो वर्ष्मामदो इवेत् शोषयती
ति हेतोरेकेन चेलान्तेन वसनखंडेनवसानौ छादयन्तौ अनवसानौ न अवसानं मृत्यु
र्ययोस्तादृशौ नवसानौ नवं नूतनं सानु शृङ्गं यस्य तादृशे पर्वते नगे हिमैराहृते
युते चेरतुः चलितवन्तौ अतिचर्म्मे एकेन पटांतेनाच्छादयन्तौ इमौ मरणरहितौ
पर्वते चलितावितिभावः नगाहृते इत्यत्र नगावृते इति पाठे सर्वं विनापि अविनाशि
नौ इत्यर्थः हृन्मेदस्तु वपा वसा युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वानावाविति नौ
इवेदिति कुगतावित्यस्य लिङि शैलवृक्षौ नगावगौ स्नुः प्रस्थः सानुरस्त्रियामित्यमरः
चेरतुरिति चरतेर्लिटि ।११। श्लो। तद्धामसः स्वापायान्नीतिरियं चेति विपदि सस्वापायां
निजवामसः स्वापायान्निर्हृत्यतामगुम्ब्व दिह सस्वापायां ।१२। तद्धामसः स्वापायानीतिः
इयं च इति विपदि सस्वापायां निजवामसः स्वापायात् निर्हृत्यतां अमुंब्रत इह सः स्वापा
यां ।१२।

नै॰ टी॰

४८
48

तद्वासइति स नलः कलिच्छन्नबुद्धिनात् विपदि विपन्नो इयमेव नीतिः इति मत्वा तां दम
यन्तीम् स्वापायां स्वापं प्राप्तानीतिस्वापायां तादृशीं सत्वापायां स्वस्वापायां विश्लेषः तत्
सहितां पुनः स्वापायां स्वस्मात् अपगतः शुभावहोविधिर्यस्याः तां दूरदृष्टामित्यर्थः
तां दमयन्तीमिह वने निजवासस्वापायात् निजं स्वकीयं यद्वासः वस्त्रं धनं तदपा
यात् तदपगमात् तद्वासः तस्या दमयन्त्या वासो वसनं निकृत्य कश्चिद् अमुञ्चत्
अस्याक्षीत् यद्वा विपदि किम्भूतायां स्वापायां स्वेन आत्मना आप्यते प्राप्यते स्वापा त
स्यां सत्यां सस्वापायां स्वापयुक्तायां दमयन्त्यां सत्यां इत्यर्थः नलो वने प्रसुप्तां दमयन्तीं
वसनार्द्धं छित्वा ऽमुञ्चदिति भावः अमुचदिति पाठे लङि ल्यदितादङ् ॥१२॥ श्लो॰ ॥
बभ्रामानस्तेन श्रमेण कलिना विधूयमानस्तेन ह्रियमानस्तेनः स्वभाग्यदोषाः
क्षमसमहिमानस्तेन ।१३। बभ्राम अनस्तेन श्रमेण कलिना विधूयमानः ते न सः ह्रि रि
पुमानस्तेनः स्वभाग्यदोषाः क्षमसमहिमानः तेन ।१३। बभ्रामेति रिपुमानस्तेनः शत्रुगर्वा
पहारी सनलः श्रमेण प्रयासेनानस्तो नाशं गतेन सता अत्यन्तपरिश्रमेण दुःखेन तेन ४८

कलिना विधूयमानः कम्पितः सन् अथवा कलिना अनेनेनामुक्तेन श्रमेणायस्य श्रमस्य
दुःखस्य कलिः प्रयोक्ता तेन परिश्रमेण दह्यमानः सन् बभ्राम पर्यटितवान् हि यस्मात्
कारणात् ते स्वभाग्यदोषाः स्वपूर्वार्जितदुःकृतादिकर्मदोषाः क्व कस्मिन् समदह्यमानः
समहताः न अपित सर्वत्रैव पूर्वत्रैव कर्मप्रधानम् यतोऽयमीदृगवनीशोप्येकाकी
गत्यराज्यभारो वने पर्यभ्रमीत् ।१३। श्लो॰ मृगकुलमारसदाविश्रममभितापातुरोम
मारसदावि॰ स्फुरिततमारसदाविस्तृतानगायत्रविपिनमारसदावि ।१४। मृगकुले
आरसत् आविश्रमं अभितापातुरः ममार सदा वि॰। स्फुरिततमा रसदा विस्तृता नगाः
यत्र विपिने आर सदावि ।१४। मृगेति स नलो दाविदावो वनवह्निस्तत् संयुक्ते प्रज्वल
दावे विपिने वनमार जगाम यत्र यस्मिन् विपिने मृगकुलं मृगगणं आविश्रमं आसमन्ततः
अविश्रमं विश्रांतिरहितं आविर्भूतश्रमं वा यथा स्यादेवं आरसत् आर्त्तिशब्दं कुर्वत् जला
भावात् तृषाकुलं ममार वि॰ पक्षी अभितापातुरोऽभिसमन्ततो यस्तापः सन्तापः तेन
आतुरः क्लान्तः सदा सर्वदा ममार [illegible]तवान् [illegible]वीति निर्विसर्गपाठे विपिनं किम्भूतं

नं० लो०
४९
५१

अपि न विद्यन्ते वयः पक्षिणो यत्र तादृशं अभितापातुर इति नलः विशेषणं इत्य
र्थः विस्तृता विस्तीर्णशाखाः रसदाः रसो भयानकरसः तं ददातीति तादृशाः
निर्यासदाः वा स्फुरिततमा प्रकाशिततमा नगाः वृक्षाः स्फुटिततमा इति पाठे
विदीर्णाः विस्तृताः भूमौ आस्तीर्णाः रसदाः निर्यासदाः दवाग्निना दह्यमानत्वात्
रसप्रदा वा नलो दवानलाकुलं वनं गतवान् यत्र भयप्रद विस्तीर्णशाखाः वृक्षाः
यस्मिन् अतिगहनतरदर्शनेन भयं भवतीति यावत् यत्र चलाः अलसा मृगा इतस्त
तो धावन्तः कृताक्रन्दाः सन्तो मृताः पक्षिणश्च मृताः तादृशं विपिनं महद्देशं गत
वानिति भावः ॥१४॥ श्लो० ॥ शोकभरोद्रेकेन श्रुतः सच नलाद्दैवतिरोद्रेकेन ॥ द्रुति
तिमकरोद्रेकेन स्वयमित्युच्चैः भयं पुरोद्रेकेन ॥१५॥ शोकभरोद्रेके श्रुतः सः च नल
आह्वय इति रोदः तेन द्रुतिं अकरोत् अश्रेण स्वयं इति उच्चैः भयं पुरः अदः तेन ॥१५॥
शोकेति तेन नलेन शोकभरोद्रेकेन शोकातिशयेन उद्रेकेन आकुलेन उत उच्चै
अश्रेण क्षिप्तेन शरीरादुत्क्रान्तजीवेन हे नल आह्वायागच्छेति रोदः रोदनं श्रुतः आक ४९

र्णितः तेन कारणेन स च नलः द्रुतिं वेगं अकरोत् च पुनः हे अस्लेन अस्लः इमोऽ
भुर्यस्य अनाथ अदः इदं ते तव भयं न इति पुरोऽग्रे स्वयं ऊचे उक्तवान् स्वकमिति
पाठे स्वकं स्वकीयं आत्मसंबंधिभयं तव नास्तीत्यर्थः शोकभरविदितमेव तस्मा नलेन
नलागच्छेति कर्कोटकनागेरितं श्रुतं सवेगेन तत्र गत्वा ते इदं भयं न भविष्यती
त्येवाचदिति भावः अस्लेन इति सविसर्गपाठे अस्लेनः अस्लः कान्त्या तिरस्कृत इनः
सूर्यो येनेति नालविशेषणम् द्रुगतावित्यस्य लोटि मध्यमे ऊचे अवेलिटि स्यात्
पुरः पुरेतोग्रतः भीतिभीः साधुसं भयामिसमरः ॥५॥ श्लो॰ क्व भवानशंसत्वस्यताप
दमित्याश्रयोऽन्त्यशंसत्वस्य तं तद्देशं सत्वस्य प्राप नलः सत्वरोऽभृशंसत्वस्य ॥६॥ क्व भवा
न् शंसतु अस्य आपदं इति आश्रयः अन्त्यशंसत्वस्य तं देशं सत्वस्य प्राप नलः सत्वरः
भृशं सः त्वं अस्य ॥६ टी॰ क्वेति स त नलो भृशमत्यर्थं सत्वरः त्वरायुक्तः सन् अस्य सत
स्य प्राणिन तं देशं प्राप गतवान् भवान् क्वास्तीति शंसतु आपदम् अस्यत्व त्यजतु
इति निगद्येति यावत् कीदृशो नलः अन्त्यशंसत्वस्य अक्रोर्यस्य कारुणिकत्वस्याश्रयो

नै॰ निवासः शोदनश्रवणानन्तरं नलो गत्वा भवान् क्वापि कथयतु आपदं विपत्तिं जहा
लो॰ तु इति निगद्य दावाग्निं प्रविशादिति भावः पंसतु शंसुस्तुतावित्यस्मानेकार्थत्वाद्वद
नमाचार्थः अस्तु त्विति असु क्षेपणे इत्यस्य लोटि विपत्त्या विपदापदो त्वंशंसो द्यातेकः
५॰ 50 क्रूरः प्रथितपापर्लिटि समसहीत जन्तुषु इत्यमरः ।१६। श्लो॰ अथ पवनाशमयन्तं क्वा
पिदवाग्नौ ददर्श नाशायन्तं । स्वबलेनाशमयत्स रुजमजिह्मदवच्च पुनरनाशामयन्तं ॥
अथ पवनाशं अयं तं क्वापि दवाग्नौ ददर्श नाशं अयन्तं । स्वबलेन अशमयत् रुजं
अजिह्मत् च पुनः अनाशं अयन्तं ।१७। टी॰ अथेति अथ समीपगमनानन्तरं अयं नलः
तं पवनाशं पवनं वातं अश्नातीति पवनाशः तादृशं तं सर्पं कर्कोटकं क्वापि दवाग्नौ
कस्मिन्नपि दवदहने अयन्तं गच्छन्तम् इतस्ततः विनाशं मृतिमयन्तं गच्छन्तं नि
तप्यन्तं ददर्श अद्राक्षीत् कीदृशं स्वबलेन स्वप्रभावेन रुजं पीडां अशमयत् तं अपरिह
रन्तम् परिहरन्तम् पुनः अनाशं आशा जीविताशा तद्रहितम् अनाशं न मृतं अ
मृतं वा जिह्मत्वाच्च पुनः अहीनमेच्छत् नलो दवदहनदह्यमानं कर्कोटकं अपश्यद् ५॰

गृहीतं चेषीत् जिह्मगाः पवनाशनः ग्रह उपादाने ऽस्य सनिग्रह गुह्योऽस्तीति निषेधा
द्धित्वे कृते लङि रूपम् ।१७॥ श्लो०॥ सचधूतनागस्तेन स्वविशेषणाविह्वलितामनाग
स्तेन । सहितोनागसेन प्रोक्तश्चात्मास्तु वेदनागस्तेन ।१८। सः च धूतनागः तेन
स्वविषेण विह्वलितः मनाक् अंशेन सहितः अनागसेन प्रोक्तः च आत्मा अस्तु वेद
नागः तेन ।१९। टी०। सचेति सच नलः धूतनागो धूतसर्पः मनागस्तेन मनाक् ई
षत् अंशेन दिष्टेन तेन कर्कोटकेन स्वविषेण विह्वलितः विह्वलो ऽवलम्बनः(?) कृतः
कृतः अनागसेन आगस्तेनातीत्यागसो न आगसो अनागसः तादृशेन निरपराधि
ना नलः किम्भूतः सहितः हितं प्राणरक्षण लक्षणं तेन सहितः कृतात्मरक्ष उक्तश्च
किमित्याह हे नल ते आत्मा वेदनागः पीडाभाक् न अस्तु न भवतु तव मत्प्रसादात्
विषवेदना माभूत् यद्वा यतः सनागः हितः तेन हेतुना उक्त इत्यर्थः नलः सर्पमुत
क्षिपन् तेनदष्टो विरूपो ऽभवत्तेनैव च तव विषपीडा न भविष्यतीत्यभिहितश्चेति
भावः अथ कथोपकथनं भावेनानुसन्धेयम् यथा कर्कोटनामा नागोहं नारदशापाव

न॰ लो॰ टी॰ ५८

चलितमशङ्कः पश्चात् समुनिरेवमाह यदा नलो राजा त्वामितो नेष्यति तावत् त्वमच
लो भूत्वाऽत्र तिष्ठ स्वनन्तो मामितो नयस्व अहं तवोपकारोपायमपि उपदेक्ष्यामि इत्युक्त्वा
समुष्टिप्रमाणोऽभूत् नलस्तं वनाग्नेस्तत्र निनाय ततस्तं कर्कोटकं नलं पुनर्वाच पदा
नि गणयन् गच्छ ततः श्रेयः करिष्यामि ततो नलेन पदानि दश क्रमेण गणयित्वा दशेत्यु
क्ते आत्ताछलेन नागस्तम् अदंशयत् ततो नलो विरूपो बभूव नागस्त्वाह जनास्त्वां न
जानन्त्विति रूपमन्तर्हापितं यत्तेन तव दुःखी जातः स कलिर्मम विषेणात्र दह्यमानस्त्वां त्यक्ष्य
ति अयोध्यां गच्छ बाहुकनामा सारथिरहमिति ब्रुवन् ऋतुपर्णान्तपसमीपे स्थीयतां स
तेऽक्षविजयविद्यां दत्वाऽश्वविद्यां नेष्यति ततस्तव कल्याणं भविष्यति मत्स्मरणार्थं
वासोयुगं गृहाण यदा इदं वासः परिधास्यसि तदा निजरूपं प्राप्स्यसि इत्युक्त्वा नागो गत
इति महाभारतनवार्त्ता तुन्नतुन्नास्तानिष्ठ्यूताविद्धविभिन्नरिताः समाः किञ्चिद्दीर्घमनागल्प
यातना तीव्रवेदना पीडा बाधा व्यथा दुःखम् अनागतेनेति तेनातेरस्यापि द्वष्यत
इति उप्रत्यये रूपम् अस्तु अस्ते लोटि ॥१८॥ ॥१८॥ ५८

८

स्यान्नरसाकल्यन्ते वपुरमुनान्नेनवाससाकल्पन्ते ये यशसाकल्पन्ते गुणोदयैर्दधति भूति
साकल्यन्ते । १९ । स्यात् नरसा कल्यं ते वपुः अमुना अन्नेन वाससा कल्पन्ते । ये यशसा कल्प
न्ते गुणोदयैः दधति भूतिसाकल्यं ते । १९ । स्यादिति कर्कोटको नलमाह हे नल अमुना अ
न्नेगृहीतेन वाससा वस्त्रयुगलेन ते नव वपुः शरीरं कल्पन्ते कलिपीडापगमे नरसा वेगेन
कल्यं निरामयं स्याद् भविष्यति ये जनाः यशसा कीर्त्या कल्पन्ते श्रीयन्ते ते गुणोदयैः गुणा
नामुदयैरधिगमैः भूतिः सम्पत्तिः तत्साकल्यं पूर्णत्वं दधति धारयन्ति ये यशस्विनस्ते गुणो
दयवशाल्लक्ष्म्या श्रीयन्त एवेति अतः खेदं माकुर्विति भावः अन्नेन त्वत्र अन्ने नेति पाठे अध्यव
सितेन ईप्सितेनेति यावत् यशसा इत्यस्य विशेषणं यद्वा निश्चयेन कल्यं स्यादित्यर्थः य
द्वा हे अन्ने नेति सम्बोधनं अन्ने अन्तकाले इनप्रभो हे इत्यर्थः वार्त्ता निरामयः कल्यः अन्नोऽध्य
वसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके कलभेदेऽस्यानेकार्थत्वाच्छ्रयणमर्थः तस्मात् कर्म
णि लटिरूपम् समग्रं सकलं पूर्णम् । १९ । श्लो॰ अपि च विनामानेन अयणीयः सर्वेप
णिनामानेनः स्वांगेनामानेन सर्वविपदो नहि त्वरणं क्व नामानेन । २० । अपि चेविना मानेन

न॰ लो॰ ५२ 52

अशरणीयः सः अरतुपर्णानामा अनेनः स्वांगेन अमा अनेन सुः विपदः न हि त्वंणां क्व नाम

अनेन ।२।। टी॰। अपीति स एव अहह हे अनेनः निष्पापनल हे इनप्रभो मोननाभि मानेन

विनापि च अरतुपर्णानामा अरतुपर्णाख्यो ऽनेन स्वांगेन स्वशरीरेण अमा सह अशरणीयो

न अपि तु अशरणीय एव तत्र मानं नकार्य्यमिति भावः यद्वा अरतुपर्णानामा इनः प्रभुः न

अशरणीय इति नेत्यर्थः हि यतः देहिनां प्राणिनां क्व नाम कुत्र नाम विपदो नविपत्तयो न

अपि तु प्राणिनां विपदः परिभूयन्त एव अनेनेति निर्विसर्गपाठे न विद्यते इनः यस्य य

स्माद्वा स अनेनः चक्रवर्त्तित्वात् तस्य सम्बोधने हे अनेन तथा च सार्वभौमत्वमानं न कार्य्य

मिति भावः त्वयाऽनेन कुत्रशरीरेण समयप्रतीत्त्या अरतुपर्णा आश्रयणीयः प्राणिनां

विपद्भवत्येवेति समाश्वासयदिति भावः कलुषं वृजिनैनोघमंहोदुरितदुष्कृतम् नामप्रका

शमसम्भावक्रोधोपक्रमकुत्सने गर्हासमुच्चयप्रश्नशंकासम्भावनास्वपि। २।। श्लो। व्रजसत्त्व

मायाहीनश्रीरित्यन्तर्हितः श्यामायाहीनः स्निग्धोमायाहीनःस्याज्जनतायाः क्वनोन्नमा

याहीनः।२।। व्रज सत्त्वं आयाहि इनश्रीः इति अन्तर्हितः श्यामाय अहीनः स्निग्धःमा ५२

याहीनः स्यात् जनतायाः छ्ल न उत्तमायाः हि इनः २१। टी॰ व्रजेति हे नल कथम्भूतः इनश्रीः
इनस्य सूर्यस्य श्रीरिव श्रीर्यस्य सूर्यकान्तिः अथवा इनश्रीरिति सर्पविशेषणं युक्तश्चैतत्
नलस्य विशेषणं तदानीं विरूपत्वात् व्रज गच्छ उद्दिष्टमृतुपर्णसमीपमितियावत् किमर्थं शमाय
शान्त्यै स्वंव मायाहि आपुहीत्युक्ताः हीनः सर्परोजो अन्तर्हितः एनमेवार्थमुपोद्घातयति हि यत उत्त
माया जनतायाः उत्कृष्टस्य जनसमूहस्य मायाहीनो निर्दम्भः इनः समर्थः स्निग्धो मित्रं छ्लकेन न
स्यात् अपि तु सर्वैरेव स्यात् कर्कोटको नलं व्रज स्वभवं लभस्व इत्युक्त्वा अन्तर्दधे सज्जनस्य सुहृ
त्मिलत्येवेति भावः स्निग्धो वयस्यः सवयाः इनः पत्या नृपा कर्योरिति मेदिनी स्यादेतत्त विधिलिङि
जनेनेति ग्रामजनबधुमहायेभ्यत्तल् २१ ॥ श्लो॰। प्रीतिवशादनवनतः कृत्वातद्वसनमात्मसा
दनवनतः वटुमांसादनवनतः सोऽस्माद्दतुपर्णमासमसादनवनतः २२ प्रीतिवशात् अनवनतः कृत्वा
तद्वसनं आत्मसात् अनवनतः वटुमांसादनवनतः सः अस्मात् ऋतुपर्णं आससाद नवनतः २२
टी॰ प्रीतीति अर्थात् स नलः प्रीतिवशात् अनवनतः न नवनं स्तुतिः अनवनं तस्मात् पन्नगा
त्तसिल् तथा च प्रीति वशादेव तद्वसनं गृहीत्वं न तु अवमानात् ऋतुपर्णनामसमाद अपि तु आससादेव

नै॰ कार्कश्येन सू किम्भूतात् न अवनं रक्षणं यस्मिन् तस्मात् रक्षाहीनात् बहुमांसादनवनतः
लो॰ वहुतरा ये मांसादनाव्याला: सिंहशार्दूलादयस्तेषां वनेतः वर्त्तते सेव्यतेऽस्मिन्निति वनं
तादृशात् बहुकण्टकात् समाक्रान्तात् समग्रात् वस्त्रमाच्छादनं तामस्मिन्नले वसनमंशुकम् तदधीनव
५३ चन इति मातिः वनेषु गासमाक्रान्तावित्यस्यवचनत इति आससादेति सदेर्लिटि ।२२। श्लो: अहृत
53 मुदा यन्तारं त्वमसमनुतमोऽश्वेनोयदायन्तारं ध्वनिसमुदायन्तारन्दधतोऽस्य हयाश्च तत्ततायं
तारं ।२३। अहृतमुदा यन्तारं तमसमनुतमः अश्वं नः यदा अयं तारं ध्वनिसमुदायं तारं दधतः
अस्य हयाः चतं तदा अयतन्त ग्रं ।२३॥ अहृतेति स ऋतुपर्णः तं नलं मुदा हर्षेण यन्तारं सा
रथिं अहृतमोऽयं नलो यदाऽश्वेना मार्गस्य तारं तारणं अमनुत मेने अंगीकृतवान् तदा
तस्मिन् काले तारमत्युच्चं ध्वनिसमुदायं ह्रेषासमूहं दधतः कुर्वन्तोऽस्य ऋतुपर्णस्य हया अ
स्वा अग्रं प्रतिशीघ्रमायतन्त आजग्मुः यदा ऋतुपर्णात् लब्धसारथ्यो नलो मार्गे तां यथेष्टं तारं
यामीत्यङ्गीकृतवान् तदा ह्रेषमाणा ऋतुपर्णवाजिनोऽतिशीघ्रं चेलुरित्यर्थः नियन्ता प्राजि
ता यन्ता गी सूतः क्षत्ता च सारथिः नोरोऽस्तु सैन्धवयाश्च इत्यमरः अथ गतावित्यस्यात्मने पदे न ५३ ॥

आयत्त ।२३। श्लो॰ अथ सहसा दमयन्त्या सा दमयन्त्यात्मशर्म निद्रामुमुचे जीवितसादमयन्त्या साद
मयन्त्यागमकृत स च यदा तस्याः ।२४। अथ सहसा दमयन्त्या सा दमयन्त्या आत्मशर्म निद्रा मुमुचे
जीवितसादं अयन्त्या सादमयं त्यागं अकृत सः च यदा तस्याः ।२४। टी॰ अथेति अथ नलत्यागमा
नंतरं आत्माशर्म स्वसुखं दमयन्त्या उपतापयन्त्या दमयन्त्या भैम्या सा निद्रा शयनं सहसा शीघ्रं
मुमुचे त्यक्ता कीदृश्या जीवितसादं जीवितस्य सादमवसादं विनाशम् अयन्त्या गच्छन्त्या प्राप्णु
न् जहत्येति यावत् स च नलः सादमयं दुःखमयं त्यागं परित्यागं तस्याः दमयन्त्याः यदा यस्मिन्
काले अकृत कृतवान् नलेऽपयाते वनप्रदेशे सहसया दमयन्त्या निद्रा मुक्ता कदा अयं नलः
दुःखप्रचुरं तत्यागं यदाऽकार्षीत् दम उपतापेऽस्य गायत्रस्य प्रात्रतस्य ह्रीति दमयन्त्येति
रूपम् सायतेऽवसायतेऽनेनेति सादो दुःखम् त्यजहानावित्यतस्मात्वर्थत्वेन कठोक्ता एवार्थः
अकृतेति कृञो लुङि॰ जीवितसादमित्यत्र धीहिं सादमिमिति पाठे धीहिं सा बुद्धिनाशस्तं ददा
तीति सः तं नलं अयन्त्या नलः कृगतः अहं वा क्व गच्छामि कुत्र तं पश्यामीति भावयन्त्या अयधा
तो गत्यर्थकत्वात् ज्ञानार्थकत्वमित्यर्थः २५। श्लो॰ सात्र ससादारामा सीतेव त्रासमासमादा

नै॰ रामा याप्रासादारामानुपेत्य भर्त्रा रतिं रमाद्रामा ।२५ साऽत्र समादा रामा सीता इव
लो॰ त्रासं आससाद अरामा याप्रासादारामान् उपेत्य भर्त्रा रतिं रमात् आर अमा ।२५। टी॰
५५ सेति अत्र भयङ्करे वने सा रामा दमयन्ती समादा सदुःखा त्रासं भयं आससाद प्राप्तवती
54 काइव अरामा रामरहिता सीतेव या दमयंती पूर्वं प्रसादारामान् प्रासादान् नृपगृहान्
आरामान् उपवनानि उपेत्य आगत्य रमात् स्नेहात् भर्त्रा नलेन अमा सह रतिक्रीडां आ
र प्राप प्रासादो देवभूभुजां आरामः स्यादुपवने सुंदरीरमणी रामा अमा सह समीपे
चेत्यमरः ।२५। तत्र पदे व्यालीनामथ विभ्रान्तं वने च देव्यालीनां नरूढ्रन्दे व्यालीनान्नति
स्थाने तयास्पदे व्यालीनां ।२६। तत्रपदे व्यालीनां अथ विभ्रान्तं वने च देव्या अलीनां
नरूढ्रन्दे व्यालीनां नतिं स्थाने तया आस्पदे व्यालीनां ।२६। तत्रेति अथानन्तरं तत्र तस्मिन्
अरण्ये तया देव्या दमयंत्या च पुनः बहु विभ्रान्तं बहुविधं भ्रमितं पर्यटितम् नलमन्वेष
यन्तीति शेषः कीदृशे वने व्यालीनां सर्पिणीनां पदे स्थाने पुनस्तरुणवृन्दे व्यालीनां छ
न्नामासक्ता अलीनां भृङ्गानां नतिं सम्रूह स्थाने धारयति पुनः व्यालीनां वयः पक्षिणास्ते ५४

॥

षामालीनां पंक्तीनामास्पदे प्रतिष्ठास्थले आलीसख्यावली अपि षट्पदभ्रमरालयः देवी कृताभिषे
कायां विश्रान्तमित्यदितो वेतोऽङ्कः विकल्पः प्रतिष्ठास्थानमापदम् ।२६। श्लो०॥ वेगवलापासितया
वेगेण भैमी युता ललापासितया । नृपसकलापासितया हतारीन्बान्धवान् किलापासितय। २७
वेगबलापासितया वेगेण भैमी युता ललाप असितया । नृप सकलापासितया हत्वा अरीन
बांधवान् किल आपासितया ।२७। वेगेनेति वेगवलेन धावनबलेन अपासितया वित्रस्तया
अपगता आसिता उपवेशनत्वं अथवा असिता विघ मानता यस्याः सा तया त्रुटितया असितया
श्यामलया वेगेण युता सहिता भैमी दमयंती ललाप विललाप किं विललापेत्याह हे नृप हे
राजन् तया सकलपासितया कलापस्तीरः असिः खड्गः ताभ्यां सहितः सकलापासिः तस्य
भावस्तत्ता तया करणेन यद्वा वेगवलापासितया वेगञ्च बलञ्च आप्नोतीति वेगबलापः
सचासौ असिश्च वेगबलापासि र्यस्य स तस्य भावस्तत्ता तया दृढखड्गवत्तया कथम्भूतया सकला
पासितया सकलानां अर्थात् शत्रूणां आपासितया अपहृतखड्गतया अरीन् हत्वा बांधवान्
बंधून् आपासि रक्षसि किलेति वार्ता त्वयि खड्गधारिणि सति अन्येषां हस्तात् खड्गाः स्वयं
पतंतीतिभावः स त्वमेकाकिनीं मां वने त्यक्त्वा कथं गतोसि पुनर्नायासीतिभावः वार्तासम्मा

नै॰ यियोः किल कलापी भूषणो बर्हं तूणीरे संहृतेपि च आपासीति पा रक्षणे इत्यस्य लटि ॥
लो॰ २७ ॥ श्लो॰ सकथंमानवनानान्यायविदाचरसि सेव्यमानवनानां । धृतसीमानवनानान्दा
राणान्त्यागमनुपमानवनानां ।२८। सः कथंमानवनानान्यायविद् आचरसि सेव्यमानव
५५ नानां । धृतसीमानवनानां दाराणांत्यागं अनुपम अनवनानां ।२८। टी॰ सेति प्रेमकरुणा
दिकमनुस्मारयन्ती आह हे मानव नानान्यायवित् मनुः प्रजापतिस्तत्प्रणीतो यो नाना बहु
प्रकारो न्यायो धर्मशास्त्रं तद् वेत्तीति तादृक् यद्वा मानवा मनुष्यास्तेषां नानान्यायो व्यवहा
रस्तं वेत्तीति ज्ञातसकलधर्मप्रोक्तमानुषव्यवहाराभिज्ञः हे अनुपम निरूपम सत्वं अनवनो
नां अवनं रक्षणं तद्रहितानां सेव्यमानवनानां सेव्यमानमाश्रीयमाणं वनमरण्यं यैस्तादृ
शानां वनमध्यगतानां धृतसीमानवनानां धृते सीमायाः कुलमर्यादायाः नवनस्तवो
यैस्तादृशानां दाराणां स्त्रियाः त्यागं परित्यागं कथमाचरसि करोषि अदुष्टभार्यात्यागे
दोषं कथं न विचारयसीति भावः सकथं मानवनानामिति सानुस्वारपाठे हे न्यायवित् प
तस्मिन्नकर्मणि धर्मोऽधर्मो वेत्ति विचारं पश्यति हे किम्भूतानां दाराणां मानवनानां मानानां

वनं गहनं येषां तेषां मानगहनानामित्यर्थः भूभृन्मित्रदाराः। २८। परकृतमेनतेनैनः स्मरामि
यन्न स्मृतोऽस्मि मेनतेन दोषममेनतेन प्रदूषये नात्र संभ्रमेनतेन। २९। परकृतं एतत्
त एनः स्मरामि यत् न स्मृतः अस्मि मे नतेन दोषममेनतेन प्रदूषये न अत्र सम्भ्रमेन तत्त्वा
इन। २९। टी॰ परेति हे इन स्वामिन् नल यत् यस्मात् एतत् मत्पित्रादिगतरूपमेनः पापं पर
कृतं परेण कालिना कृतं स्मरामि जानामि न पुनः त्वं मे मया तत् तस्मात् तत्तेन सत्स्वरूपेतेन
याथार्थ्येन न स्मृतोऽस्मि न ज्ञातोऽस्मि अपि तु तत्त्वतो ज्ञातोऽस्मि त्वं स्वबुद्ध्या एवं नाचरसि अत्र सं
भ्रमे दुःखे दोषममेनतेन मद्दूषणेन त्वां न दूषये न दूषयामि कलिकृते अपराधे त्वां तै
कथं दूषयामि त्वं सर्वदा दूषणरहित इतिभावः नञ् काक्वर्थे समौ संवेगसंभ्रमौ दूषय इति
दोषणाविकृते रूपम्। २९॥ श्लो॰ हृदयाकायाहतेन स्थीयेत यथैव पावकायसेन। याव
त्कायेसेन त्यज्येत स्वहृदि चाधिकायसेन। ३०। हृदयौकाः यः तेनं स्थीयेत यथा एव पाव
कायः तेन यावत् कायः तेन त्यज्येत स्वहृदि च अधिकायसेन। ३०। टी॰ हृदेति दमयंत्या
त्मानं प्रत्याह हे स्व आत्मन् यावत् यत्काल पर्य्यन्तं ते त्वया कायः न त्यज्येत न मुच्यते ता

न॰ वत् यस्ते तव हृदेयाकाः हृदयमोकः आश्रयो यस्य सः हृदयवासी नलः तेन नलेन हृदि हृद
लो॰ ये अधिकायस्तेन अधिकमायस्तेन व्याकुलेन न स्थीयेत अपि तस्याततमेव किमिव यथै
व पावकायः पावके ऽग्नौ अयो लोहमिव दहनगतलोहमिव हे आत्मन् यावत् त्वमिमं
५६ कायं न जहासि तावत् विरहानलप्रदीप्ते मत् हृदि नलः स्थास्यति यथाग्नौ लोहमेवं तस्मम
56 त्रियस्य दुःखं भवतीति त्वं शीघ्रं कायं जहीहीति भावः स्वेनात्वात्मनि स्थीयेतेति ओमाङ्याग
पाजहातिः सा हलीति दीर्घः पिण्ड कालायसायसी आयस्तेति आङ् पूर्वकयसप्रयत्ने धातोः
क्तः ३॰। श्लो॰ यस्य पदे शंकमितः स्वजनो यं प्राप्य जनपदेशंकमित । अरिवृन्दे शंकमित
स्मित सततमुपागतोसि देशंकमितः ।३१। यस्य पदे शं कं इतः स्वजनः अयं प्राप्य जनपदे शं
कमित अरिवृन्दे अशङ्कमितस्मित सः त्वं उपागतः असि देशं कं इनः । ३१। यस्येति अयं स्वजनो
बन्धुवर्गः यस्य पदे तव राज्ये यं त्वां जनपदेशं राष्ट्राधिपं प्राप्याधिगम्य शं कल्याणं कं सुखं इतः
प्राप्तवान् हे कमितकान्त अरिवृन्दे शत्रुसमूहे अशंक शंकारहित मितस्मित मितपरिहास
त्वं इनो वनात् कं देशं कां भुवं उपागतोसि गतवानसि आदौ यंस्वपदेशमितिपाठ स्वपदेशं ५६ १२

शोभनोऽपि दिश्यते इत्युपदेशो नाम तादृशं शोभनाख्ये यं जनपदेशं प्राप्य स्वजनः कं सुखं
श्रयः शुभावह विधिर्द्रुतः प्राप्तः यद्वा स्वपदे स्वस्थाने स्थानान्तरं कथमभूत् अशं अकल्याणं
इत्यर्थः दमयन्ती विलपन्तीदमाह हे नल यं त्वां राज्याधिपं प्राप्यात्मीयलोकः सुखं प्राप्तवान्
समान्दुःखजलधौ मज्जन्तीमुपेक्ष्य अस्माद् वनात् कं देशं गतवान् पदं व्यवस्थितत्राणस्थान
लब्ध्वा [illegible] व स्वेषु पं सुखं कामुकान्तानि तस्येक्षो वंधुस्वस्वजनाः समाः स्वोज्ञाता वात्मनि स्वस्ति
ख्यात्मीये स्वोस्थितिर्यान्याने स्वपद इति निमित्तसप्तमी ॥२१॥ श्लो॰ यद्यशसानुहरोदःकुहरं
योऽद्य [illegible] रजसानुहरोदः । अद्रेः सानुहरोदः किमापदयितो मम इति सानुहरोद ।२२। यद्यशसा
अनुरु रोदःकुहरं यः द्रुष्टः अन्नसानुउरोदः । अद्रेः सानु हरोअदः किं आपदयितः मम इति
सा अनुहरोद ।२२। यदिति हे हरो हे चित्रमृग यद्यशसा यस्य कीर्त्या रोदःकुहरं द्यावाभूम्य
न्तरं पेकान्तया रोदः आद्रः सान्तः स्वर्गभूमिवाची तयोः कुहरं विवरं अनुरुत् आविपुलं अलं हो
तं अपमानितमिति भावः यश्च द्रुष्टः द्वेषं कुर्वतो नः पुरुषस्य अन्नसा झटिति उरोदः उरोव
दो द्युति बोग्दयतीति नाटक हिषद्व तो विदारणशरवर्षीमित्यर्थः सममदयितो वल्लभो नलो

न॰ ऽद्रोऽद्रेः सानु गिरेः समभूभागं किं प्राप प्राप्तवान् इत्युक्त्वाऽनु रुरोद पश्चात् अरोदत् वने
लो॰ दमयन्ती मृगं पृच्छति वने चरन् दीर्णः यत् कीर्त्या द्यावा भूमी पूरिते यश्च द्विषद्वनदानलः
किं गिरिसानुं प्राप्तवानित्युक्त्वा रुरोद बद्धोरुविपुलम् द्यावाभूमीच रोदसी पुरुषाः पूरु
५७ षाः नराः स्नुः प्रस्थः सानुरस्त्रियां उरोद इति ऊरोघतीतिदो अवखंडने थातो रतोऽनुपस
57 र्गे क इति कः हारसमारुरुत्सकुरंकुशंवररोहिषाः आपत्यापेलिंटि पश्चात् सहश्रपयो
रनु रुरोदेति रुदिर् अश्रुविमोचन इत्यस्य लिटि ॥३२॥ श्लो॰॥ अय कलनामानन्नेत्ययज्ञ
नोददतिचाङ्गनामानने॥ हार्दं नामाननेत्र जनमेनमशोककुरु सनामाननेन्॥ ३३॥ अय
कलनां आनंनेत इति अयं जनः ददाति च आङ्गनाः मानंते हार्दं नाम अननेन्न जनं एनं अशोक
कुरु समानंनेत्र ॥३३॥ अयेति दमयंत्यशोकमुपगम्याह हे अशोकवृक्ष अयं जनो मल्लक्षण
आननेन प्रणामतीति कलनामुद्दिश्य स्वजां वाश्रय आश्रय गृहाण अङ्गनाः स्त्रियस्ता नेत्रमानं
स्वजां दोहदं वा ददति ददते स्त्रीसंस्पर्शात् तव पुष्पोत्पत्तिरिति भावः नाम सम्भावनायां अतो
अननेन बहुतरे हार्दं प्रमाणं सति एनं जनं नेत्रव समानमानं स्वनामाख्ये अशोकं शोकरहितं ५७

कृत्वा ह्रदः कर्म्महार्द्दं हायनान्तयुवादिभ्योऽणित्यण् हे अशोक त्वां नौमि मामपि शोकरहितं
कुर्व्विति भावः ।२३। श्लो॰ उच्चशिरोदारावालप्येति वने सुबन्धुरोदारावा । इति मकरोदारावारु
दं मरुतलमथो सरोदारावा । २४। उच्चशिरोदारैरालप्य इति वने सुबन्धुरा उदारावा। इति
अकरोत् आरं आवाः रुदन्ते मरुतले अथो सरोदारावा । २४। टी॰ उच्चेति सुबन्धुरा अत्यन्तसुन्दरी
उदारा वा उदारा आवा गतिर्यस्याः तादृशी दमयन्ती उच्चशिरोदारे उच्चशिरसो दारवो देवदा
रुद्रुमा यस्मिन् तादृशे वने इति पूर्वोक्तमालप्याभाष्य विलप्य वा इति वेगं अकरोत् गतिं
वा यद्वा उच्चशिरा उच्चग्रीवा उदारावा उत् ऊर्द्ध्व आरावः शब्दो यस्याः सा उच्चस्वरा उच्चैः
विलप्येति यावत् यद्वा एवार्थे वा शब्दः उदारा दक्षिणा उदारो दातृमहतोर्दक्षिणेप्यभि
धेयवत् इति मेदिनीकरः अस्ति चार्दतोपि शिरःशब्दः पिरांड दद्याङ्कयापिरे इति दर्शनादि
त्यर्थः अथो वेगकरणानन्तरं सरोदारावा रोदनाशब्दे सहिता रुदन्ती रुदं शुष्क अथवाः जल
हीने न विद्यते वाः जलं यस्मिन् तादृशे मरुतले मरुदेशं आर गतवती क्वचिदपि सुन्दरे वने
विलप्य दमयन्ती निर्जले मरुदेशं गतवती रुदतीति भावः दाहशाब्दस्य वृत्त वृत्तान्तप्रवृत्तिनिमि

न॰ नत्वात् भाषितपुंस्कत्वेन तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति पुंवद्भावात् चेराणा
लो॰ दि इत्येव प्रवृत्तिनिमित्तत्वेनास्य पुंस्त्वाश्रयणात् भद्रदारुद्रुकिलिमं पीतदारु च दारु चे
त्यमरः व्रागतिगन्धनयोरित्यस्माद्वेति वासमुच्चय एवार्थे इहि हेमः ऋगतावित्यस्मारे
५८ 58 तिच ।२४॥ मृगकुलमारव्याधिप्रचुरं विभ्रद्वनं समारव्याधि । वीथ्या साऽरव्याधिष्ठितभुज
गम्भीमजेयमारव्याधि । २५। मृगकुलं आरवि आधिप्रचुरं विभ्रत् वनं समारव्याधि ।
वीथ्या मारव्या अधितभुजगं भीमजा इयं आर व्याधि । २५॥ टी॰ मृगेति इयं भीमजा दमयं
ती मारव्या मनोरियं मारवी तया वीथ्या मार्गेण समारव्याधि मारस्य कामस्य व्याधिः मा
रव्याधिः तत् सहितं आरवि मशब्दम् यद्वा आरवि आराः इतस्ततो जङ्गमा वयः पक्षिणो
यत्र तत् अधिप्रचुरं मानसीव्यथाबहुलं मृगकुलं विभ्रद् धारयद् वनम् आर गतवती की
दृशं वनम् व्याधिव्याधो लुब्धकस्तत् सहितं अधिष्ठितभुजंगं अधिष्ठिताः भुजगाः सर्पा
यस्मिन् तत् समारव्याधिरिति सविसर्गपाठे दमयंती विशेषणम् पुंस्याधिर्मानसी यथा
स्त्रीरुग्जाचोपतापरोगव्याधिगदामयाः आरेति ऋगतावित्यस्माल्लिटि वीथ्यालिरावलिः ५८ 14

पंक्तिः श्रेणी लेखास्तु राजयः वीथीपदवपीत्यमरः ३५॥ श्लो॰ सास्रवनासारासावेगमना

भीमनंदनासारासा। सनयननासारासावजगरमग्रासि चामुनासारासा ।३६। सास्रवना

सारा सावेगमनाः भीमनन्दना सारासा। सनयननासा आर असौ अजगरं अग्रासि च अमु

ना सारासा ।३६ सास्रेति सास्रवनासारा अस्रवनं अश्रुजलं तस्या सारो वेगवर्षणं तत्स

हिता सावेगमना आवेग उद्वेगः तत्सहितं मनो यस्या सा ईदृशी सारासा आरासा रोदनवे

लेन सहिता यद्वा आसारासा असारः अस्थिरः आस उपवेशनं स्थिति र्वा यस्याः सा भावे घञ्

असौ भीम नन्दना दमयंती अजगरं मध्ये आर प्राप्तवती अमुना चाजगरेण सारा श्रेष्टा सा

दमयंती अग्रासि ग्रस्ता कीदृशी सनयनासा नयनं च नासा च नयननासं शोभनं नयन

नासं यस्याः सा तादृशी सुनेत्रनासिकेति यावत् महतलमटंती दमयंती अजगरं अद्राक्षीत्

तेन चाजगरेण समुखी कवलिता इति भावः वनं सलिलं कानेन आसारो वेगवर्षणाम्

नेदियग्रहिपचादिभ्यो ल्युणिन्यच इति ल्युनन्दनेति इंद्रश्च प्राणिनां तूर्यसेनांगानामिति

नयननासमित्येकवद्भावः आरेति ऋगतावित्यस्य लिटि अजोरणायुर्वोहम इत्युभौ अमु

न॰ गलस्य अदने लडि। चिरिणि हृद्दो अग्रासीति अश्रु नेत्राम्बु रोदनं चास्रमस्तु च स्मारो बलेऽस्थि
लो॰ गेशे च न्याय्ये स्त्रीवे वेरविश्व ।३६। श्लो॰ अथ शबरो हास्यन्तं स्वासून् तदसून् अरिपुतरोहास्य
न्तं समधिहरोहास्यन्तं न्यस्य तदास्येऽकरोत् खरोहास्यन्ते ।३७। अथ शबरः हास्यन्तं स्वासू
५९ न् तदसून् च रिपुतरोहा अस्यन्तं समधिहरोद अस्यन्तं न्यस्य तदास्ये अकरोत् खरः हास्य
59 न्ते ।३७। टी॰ अथेति अथाजगरग्रसनानंतरं रिपुतरोहा रिपूणां तरो बलं हंतीति रिपु
तरोहा शत्रुबलघातकः शबरः किरातः स्वासून् स्वप्राणान् हास्यन्तं जिहासन्तं तदसूंश्च त
स्या दमयंत्या असून् प्राणान् स्यन्तं विनाशयन्तं अजगरं समधिहरोद आहृतवान् तं हास्य हा
स्ययोग्यम् अकरोत् अकार्षीत् किं कृत्वा तदास्ये तस्या जगरस्यास्ये मुखे अस्यन्तं खड्गाग्रं न्य
स्येति द्वितीयः शबरः किम्भूतः खरस्तीक्ष्णस्वभावः शबरो दमयंती प्राणान् विनाशयंतं मा
रयिष्यन्तं तमजगरं खड्गाग्रभिन्नमुखं अमारयदित्यर्थः रिपुतरोहेति ब्रह्मभ्रूणवृत्रेषु
क्विबिति हन्तेरण् ब्रह्मादिष्वेव हन्तेः प्रयोगाच्च चिन्त्यमिदम् यद्वा शबरः कथम्भूतः रिपु
तरः हा इति कृत्वा हा विषादे च शोके च कुत्सार्तिक्रोधयोरपीति मेदिनी हास्यन्तमिति ५९ १९

अहाकत्याग ऽ नोऽल्टः शद्वतिशाना शुभमिभूम्यसवः प्राणाः तरसी वलरंहसी योनकम्मिणीत्यस्य
स्यन्तमिति समयिहरोहेति लिटिहास्यमिति तदर्हतीति यः ३७। श्लो०। तामपुनरेकामयतः कृशां
किरातः स्मरातिरेकामयतः कान्तारेकामयत स्त्रियं नकांक्षेदुपह्वरेकामयतः ।३८। तां पुनः एकां
अयतः कृशां किरातः स्मरातिरेकामयतः। कांतारे अकामयत स्त्रियं न कांक्षेत् उपह्वरे कामायतः
३८। टी०। तामिति तां दमयन्ती एकां एकाकिनीं सहायरहितां अयतः अशुभदैवात् कृशां तनुं दैव
वशात् दुर्बलमित्यर्थः स्मरातिरेकामयतः स्मरस्य कन्दर्पस्यातिरेकं आधिक्यं स एवामयो व्याधि
स्तस्मात् कन्दर्पाधिक्यव्याधे र्हेतोः किरातः कान्तारे महावने अकामयत अयं कमत् स्त्रीत्वेनेति
शेषः त्वं मम भार्या भवेति कामनाम् अकरोदिति भावः अत्र हेतुमाह कामयतः कामेन यतः सं
यतः कामातुरः उपह्वरे रहसि स्त्रियं न आकांक्षेत् न इच्छेत् किं नञ्काक्वर्थः अपि कांक्षेदेव
उपह्वरे रहसि सन्निधौ इति हेमचंद्रः ।३८। श्लो०। धूर्तवनमह्यन्तेन ज्ञातासि मया ननु त्वमह्य
न्तेन मानिनि मह्यन्तेन प्रसीद शरणागताः क्वमह्यन्तेन। ३९ धूर्तवनमह्यन्तेन ज्ञाता असि मया
ननु त्वं अह्यन्तेन मानिनि मह्यन्तेन प्रसीद शरणागताः क्वमह्यन्तेन ३९। टी० धूर्तेति शबरो भैमीं

न॰ माद्दृ ननु न ननु भो मानिनि दमयन्ति धृतवनमध्यन्तेन धृतः श्रितो वनमध्यन्तो वनभूमिप्रांतं
ल॰ येन तादृशेन मह्यं तेन सर्वनाशकेन मया त्वं त्रातासि रक्षितासि तेन हेतुना मह्यं प्रसीद प्रसन्ना
भव शरणाय आत्मत्राणाय आगताः प्राप्ता जनाः क्व कुत्र न मह्यन्ते न पूज्यन्ते हे दमयन्ति अग्र
६॰ गं विनाशं मया न ततनासि अद्य शरणागताय मे प्रसीद मह्यन्न इति महत्पूजायामित्यस्य कर्म्म
णि लटि शरणं गृहरक्षित्रोरित्यमरः नन्वात्तये पतिप्रश्ने प्रसक्ता वधारणे वाक्यारम्भेष्वनुनया
यन्त्रणानुज्ञयोरपीति हेमः अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः अवयवेपीदि हेमः ३९॥
स्नो॰ स्मरमुखनिशापतेन। स्मर दासानिति प्रोच्य वशापतेन दत्तेशापतेन स्थितया सान्त्वेन चलदृशा
॥ग॥ पतेन स्मरमुखनिशापतेन। स्मर दासान् इति प्रोच्य वशापतेन दत्तशापेतेन स्थितया आसान्त्वेन
चलदृशापेतेन। सं॰टी॰ स्मरमुखेति हे स्मरमुखनिशापि सशोभनं मुखं स्मरमुखं तदेव निशापः चंद्र इव
यस्याः सा स्मरमुखनिशापा तस्याः संबोधने हे शोभनमुखचंद्रे ते तव नोऽस्मान् दासान् स्मर जानीहि
इत्यनेन प्रकारेण प्रोच्य उक्त्वा सान्त्वेन क्रोधेन स्थितया चलदृशा चंचलाक्ष्या शापे दत्ते वशापेतेन
वशामेदत्तया अपेतेन हीनेन सता मदनज्वलनदह्यमानेमेदसा तेन पावकेण किन्नयेत अपि तु मूर्छितमेव ६०
मत्तकाकर्थः क्रुद्धया दमयन्त्या शापे दत्ते शवेन मूर्छितो ॥

ऽभूदिति भावः सुमुखि विशापयेतेनेति पावि हे शोभनमुखि नेतवनः अस्मान् दासान् स्मरेति विशा
पे शापाभावे शापपूर्व्वमित्यर्थः प्रोच्यतेन न पतितमिति काकुः हन्मेदस्तु वचावसा सामसात्व
मुभे ममे पेते इति पतते कर्म्मणि लिटि । ४० ॥ श्लो० । दग्धमरागाहितयादमयन्त्याविपिनभूः
परागाहितया उज्ज्वलरागाहितया दृष्ट्वा चोराचकन्दरागाहितया । ४१ । दग्धसरागाहितया
दमयंत्या विपिनभूः परा अगाहि तया उज्ज्वरागाहितया दृष्ट्वा चोरा चकंदरा अगाहि तया ४१ ॥
टी० दग्धेति दग्धमरागाहितया दग्धः सरागः सकामो ऽहितः शत्रुः शावरो यया सा नाइश्या त
या दमयन्त्या ऽपरा ऽन्या विपिनभू वनभूमिरगाहि अत्रगाहिता उज्ज्वरागाहितया उज्ज्वरा ये अगा
वृत्तास्तेषांहितया आरोपितया दृष्ट्वा च चौरा भयाकुला कन्दरा दरी अगाहि कन्दरागा हितयितेय
के पंदवा कंदरायुक्ताद्रौ अहितया दिमयेत्यर्थः अत्र पदे चोरेति भूविशेषणम् यद्वा परागा
हितया पुष्पधूलिव्याप्तया दृष्ट्वा वनभूः अगाहि विलोडितेत्यर्थः दग्ध शवरया तया भैम्या अ
न्या ऽटवी अवगाहिता चौरा कंदरा चादर्शि इति भावः गाह अवगाहने स्मात् लुङि चिणि ४१ ॥
श्लो० । पदवा पदवा पदवापदवा रयतोद्विवनेविललापचसा तमसा तरसा तरसान्तरसा

म. न्वयदुःखहृणीष्वसखेमरणं ॥४१॥ पदवा अपदवापद् अवापद् अवाप् अयतः अद्रिवनं विलला
ल. प च सा तरसा अन्तर सान्तर सान्तर सान्वदुःख हृणीष्व सखे मरणं ॥४२॥ टी॰ पदवेति अयतः
शुभदेवात् पदवा पदाभ्यां वातीति पदवा सा दमयंती अपदवापत् अपगता दवापत् दवाग्नि
८१ जन्यदुःखं यस्मात् तं तादृशमद्रिवनं पर्वतवनं अवापत् लेभे रयेन वेगाद्वापदिति वा की
६१ दृशम् अवाः न विद्यते वा जलं यस्मिन् तत् जलरहितं विललाप च पर्यदेवीच्च हे सान्तर सान्त
अन्तरसहितं रसान्तरं करुणातिरिक्तं रसो यस्मात् तादृशं सान्तरदुःख इति पाठे अन्तः करणदुः
खसहित हे हे अन्तर आत्मन् सखे मित्र तरसा वेगेन मरणं हृणीष्व वरय पदचारिणी दमयं
ती दवविपद्रहितं जलशून्यं गिरिवनगता विलापं चकार्षीत् हे आत्मन् सपरिवारदुःखाकुल
मरणमिदानीं वरय साम्प्रतं कियत् सहे मम मरणमेव वरमिति भावः अवापदिति आपेर्लुङि
त्वादङ् रपलपजल्पव्यक्तायां वाचीत्यस्य लिटि ललापेति अन्तरं अवकाशावधिपरिधानान्तर्धि
भेदतादर्थ्ये छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च समरः ॥४२॥ श्लो॰ वृककोपपुरः
सरसा सरसा सरसा सरसा भवतानन्तुसा। किमृते दयितादयितोदयितोऽदयितास्ति ममेह सुखं
दयितो ॥४३॥ ८१ ८

वृक कोपपुरःसरं आसर मा सर मा सरमा भवता ननु सा। किं ऋते दयितात् अयतोदयतो
दयतः अदयतः अस्ति मम इह सुखं।४३।। वृकेति वने गच्छन्ती कंदरातो निःसृतं व्यालम्
एवं वृकं दृष्ट्वाह हे वृक त्वरितो कोपपुरस्सरं क्रोधपूर्वकं मा मा आसर आगच्छ माम्भक्षये
त्यर्थः मा सर इतो मा गच्छ ननु भोः सा तव स्त्री वृकी भवता त्वया सरमा सलक्ष्मीका भवतु
तथा च मां भक्ष्य स्वस्त्रिया सह स्थीयतामिति भावः यद्वा सा सरमा आपदत्वात् शुनी तव स्त्री
त्वया सरमा भवतु इति शेषः अतो मा सर अन्यत्र मा गम्यतां मामेव भक्षयेत्यर्थः अयतोदय
तोदयतः अयं शुभं दैवं तस्य तोदः दोषस्तत्र यतो रत उदयो ऽभ्युदयो वा यस्य तादृशात्
अदयतः निष्करुणात् दयितात् स्वीयात् नलात् ऋते विना इह आवसरे मम किं सुखमा
स्ति स्वास्थ्यमस्ति यत्तु हे अयतोदयेतेति भिन्नम्पदं अयो दैवं तेन या पीडा तया यतः बद्धः
दैवपीडित उदयत उद्गच्छतः अपरं तथैवेति ध्येयम् यद्वा हे वृक कोपपुरःसरं मा सर स्वगृ
हात् मा गच्छ आसर परावृत्य आगच्छ सा तव स्त्री सरमा सलक्ष्मीका भवत्वित्यर्थः तथा च
क्रुद्धः सन् गृहात् मा गच्छेति भावः दमयंती वृकमाह हे वृक त्वं मा आसर नलात् ऋते मम

न॰ किं सुखं जीवितेन वा किं प्रयोजनं अतो मां भक्षयित्वा स्वस्त्रियामहैव स्थीयतां मा विरही
ला॰ भवेति तात्पर्यार्थः नरवत्सस्तु मृगादनः हृकोपि आमृतेरति वर्जे लोटि मा शब्दोः यन्नमाङ्क्ष्म सर
मा श्मनी प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु पृथग्विनान्तरेणार्ते विरुक्त नानाच वर्जने।
६२ ४३॥ श्लो॰ अयि राक्षस भक्षय मां क्षुधितो न वसा न वसा न वसा न वसाः रुजमुज्झ जनेत्र च हे
62 करुणान्तर दान्तर दान्तर दान्तर दा ॥४४॥ अयि राक्षस भक्षय मां क्षुधितः न वस अनवमान
वसान वसाः रुजं उज्झ जेन अत्र च हे करुणान्तर दान्तर दान्तर द अन्तर अदां। ४४ टी॰।
अयीति भैमी राक्षसं दृष्ट्वाह अयि अहो राक्षस वसाः मेदांसि वसानाच्छादय अनवमानमर
णाद्दीन क्षुधितो बुभुक्षितस्त्वं न वस न तिष्ठ मां भक्षय अत्र च जेन मल्लक्षणे करुणान्तर दान्तर
दान्तरद करुणान्तरं करुणावकाशस्तेन दान्त उपशान्त रदान्तरं दन्तान्तरं ददातीति तादृक
करुणा हीन रदान्तरप्रदायक रुजं पीडां उज्झ त्यज मयि पीडां त्यज अहं अन्नं हृदयं अदां
दत्तवती यद्वा करुणां तव मन्तर मद्विषये दयां त्यजेत्यर्थः हेदान्तरदान्तरद दान्तः समर्थः रदो
दन्तः तस्मान्तरेण यति खण्डयति स हे राक्षस मयि स्त्री अवध्येति रुजं त्यक्त्वा मां भक्षयक्षमहे ६२

शरीरं दत्तवतीत्यवोचदिति भावः अददामिति ददातेर्लुङि। यददपि वेहः करुणान्तरदान्तरदान्तर
दान्तरद इति पाठः आन्तरं चित्तं द्यति खण्डयति तां रुजं त्यज त्वमत्र करुणां वेहः हे रदान्त
द दन्तान्तरप्रद दान्ते संसारं तर इति तदर्थः ॥५४ श्लो॰ करमाकरमाकरमाकरमाकलय
व्यसनं मम पाहि हरे दरतो दरतो दरतो दरतो विहृतैर्महतां सुकर त्वमपि ॥५५॥ करमाकर
माकर आकर आकलय व्यसनं मम पाहि हरे। दरतः दरतो दरतो दरतः विहृतैः महतां सु
कर त्वमपि ॥५५॥ टी॰ करमेति हे रमाकर लक्ष्मीप्रद कं ब्रह्मन् मम व्यसनं विपदं माकरं
आकरं मकराणामयं माकरस्तादृशमाकारं खेति आकलय मम शोकं समुद्रं जानी
हि महतां देवानां सुकर अहमच्छकर हे हरे कृष्ण नामोच्चारणेन हरति पातकानि इति
हरिः तस्य सम्बोधनं त्वमपि अदरतो दरतो दरतः अदरोऽनल्पो यस्मात् दरो दुःखं तत्र रतं
उदरमभ्यन्तरं यस्य तादृशात् दरतो भयात् विहृतैः राज्यासनवचनैः पाहि रक्ष यद्वा शं
सुखं रमा लक्ष्मी तयोराकरः उत्पत्तिभूमिः स चासौ माकरः शोभाकरश्च तत्सम्बोधनं

न॰ माकरं मकरसंबंधिसमुद्रसदृशं मा लक्ष्मीः तस्याः आकरः उत्पत्तिस्थानं समुद्रमिवेति वा
लो॰ र्थः हे ब्रह्मन् ममशोकः समुद्र इव प्रवृद्धः देवभयापहारिन् हे कस्मात्त्वमीदृशो कष्टे
६३ मामाप्यास वाग्भिः रक्षेत्याहेतिभावः माकृते वैधसिव्रध्ने पुंसि कः ख्वनिः स्त्रियामाकरः
63 स्यात् एकत्र करोतीत्याकरः सदोरप् व्यसनं विपदि भ्रंशे दोषे कामजकोपजे पाहीति
पारक्षणेस्य लोटि सकरेति ईषद्दुःसषु कृच्छ्रा कृच्छ्रार्थेषु खल् दरोस्त्रियामभये स्वभ्रे एवं
कस्य ब्रह्मणो रमाकर लोकाधिपत्यकर हे सकर शोभनहस्त दरतोदरतोदरतः दरो
भयं तस्य विकृतै मां पाहि रक्षेति ध्येयं ॥४५॥ श्लो॰ त्वदरिर्निषधेश समृद्धिमनारमयारम
यां रमयां रमयाः व्यसनं त्वमुपैमि कदानुसभी शामनां शमनां शमनां शमनाः । ४६ ॥
त्वदरिः निषधेश समृद्धिं अनारमया रमया आर मया अरं अयाः । व्यसनं त्वं उपैमि कदा
नु सभी शामना शं अनाशं अनाशमनाः ४६ टी॰ त्वदरिरिति हे निषधेश नल त्वदरिः।
पुष्करः अनारमया अनवसानया रमया लक्ष्म्या रमणया वा समृद्धिं हर्षमार प्राप्तवान् त्वं
मया सह अरं शीघ्रं व्यसनं विपत्तिं अयाः गतवानसि अनाशमनाः आशोच्छा नद्ररदितं । ६३

मनो यस्यास्तादृशी यद्वा तद्दृविः कथम्भूतः अनाशमनाः नविद्यते नाशो विनाशो मनो ।
यस्य स तथेत्यर्थः सभीशमना भीर्भयं तच्छमनं शान्तिस्तत् सहिता शांतभीतिः अनाशं ।
नाशरहितं शं सुखं कदा उपैमि कस्मिन् काले उपगच्छामि नृष्टच्छायां कदा सुखं लप्से ।
इति अलपत् यातेर्लटि॰ अयाः उपैमीतीणः विभाषा कदा कर्ह्योरिति भविष्यति लट् नृष्ट
छायां विकल्पे च ४६ ॥ श्लो॰ यमना यमना यमना यमना गभिवीक्ष्य रतन्द्रवतीह परः ।
सहृषो निषधत्विति नाथ गलन्नवमा नवमा नवमा नवमाः ४७ । यं अनायमनाः यमना
य मनाक् अभिवीक्ष्य रतं द्रवति इह परः सः पुरुषः निषधत्विति नाथ गलन्नवमानवमान ।
वम अनमा । ४७ । टी॰ यमनेति अनायमना अनीतिमना अनीतियुक्तः नय एव नायः अन्या
यपर इत्यर्थः यद्वा आयो धनागमस्तद्रहितमनाः सन् परः शत्रु र्मनागीषत् यमनाय ।
जीवापहारणाय रतमासक्तं यं त्वां वीक्ष्य इहलोके परः शत्रु द्रवति दूरादेव पलायते हे ।
निषधत्विति नाथ निषधेश नल गलन्नवमानवमान गलन् स्खलन् नवमानवाः तरुणास्तेषां ।
मानो गर्वो यस्मिन् नादृक् सतं अनवमाः अवमाः अधमाः न अवमाः अनवमाः श्रेष्ठाः

न॰ हृषः क्रोधान् वम उद्गिर हे नल यं त्वां कृतानीति॰ शत्रु ईदृशमयतमीषदप्यालब्ध पलायते
लो॰ स त्वं परहृतसर्वस्वः नागीरः कथं नोद्गिरसि वने वने किमटसीति भावः किञ्चिद्दीषन्मनागल्प
६५ दुर्गताविरपस्य लाटिद्रवतीति रुट्क्रुधो स्त्रियो रुट् वमउद्गिरतो ऽस्माल्लोटि उद्गिरेति निकृष्टप्र
65 तिकृष्टार्थरेफयाप्यावमाधमाः। ५७। श्लो॰ नयमा नयमा नयमा नयमा वसप्रत्यानिवासमनु
म्भवता भवनीयमपायमरीनुदया नयता नयता नयता नयता। ५८। नयमानयमान् अयमान।
यं आवसः एत्य निवासं अमुं भवता। भवनीयं अपायं अरीन् उदयान् नयता अनयतानयतान्
अयता। ५८। टी॰ नयमेति नयमानयमान् नयो नीति र्मानो ऽभिमानो यमो विश्रमो नियमो वा।
तान् अयमानः प्राप्नुवान् तस्य सम्बोधने हे नयमानयमानयमान नीतिमभिमानं नियमञ्च धा
रयन् यं निवासं राष्ट्रमेत्य प्राप्य आवसः यस्मिन् राष्ट्रे ऽतिष्ठः अमुं निवासं अयता प्राप्नुवता उद
यान्नुद्गतो ऽयो शानं येषां तादृशान् अनयतानयतान् अनयो ऽन्यायः तस्य तानो विस्तारस्तात्र
यतान् अन्यायविस्तारकान् अरीन् शत्रूनपायं नाशं नयता प्रापयता भवता त्वया भवनीयं भवित
व्यं हे नल यत्त्रिजराज्यं प्राप्य पूर्वमास्थाः पुनस्तदेव राज्यं गच्छता त्वया शत्रून् विनाशयितव्यं ६५

२।

समर्थेन भवितव्यमिति तदेव निजपुरं गच्छति अलपदिति भावः आवस इत्यस्याधारस्य निवास
मित्यस्याप त्वध्याहृ॰ वस इति कर्म्मतम्। ४८। श्लो॰ सनया सनया सनया सनया ह्यसहद्दृटयावि
पदंस्वपदं। हितदे हितदे हितदे हितदे त्वलपद्बहुधा नरदेवसुता। ४९ सनया सनया सनया।
सः न याहि असहद्दृटया विपदं स्वपदं। हितद ईहितदेहि तद् इति अलपत् बहुधा नरदे
वसुता ४९। टी॰ सनेयति हे हितदं हितमीप्सितं वस्तु ददातीति हितद नल सर्व सनयासन
या नयो नीतिस्तस्या असनं त्यागस्तत् सहितया त्यक्तनीत्या असहद्दृटया पात्रकरिसमूहेन
विपदं नाशं न याहि मा गमः ईहि तदेहि ईहिता इष्टा उपकर्त्तारो देहिनो जना यस्मिन् तादृश
तत्स्वपदं स्वनगरमेहि आयाहि इत्यनेन प्रकारेण सनया नीतिसहिता नरदेवसुता भीमभू
पपुत्री बहुधा बहुप्रकारं वालपत् विललाप यद्वा हितदेहितदेहीत्येकं पदं हितदं ईहितं चेष्टि
तं येषां ते तादृशा देहिनो यत्र तत् स्वपदं राज्यमेहि हे नल एवमेकाकी शत्रुहस्ते मा गच्छेः शत्रव।
एकाकिनं त्वां दृष्ट्वाऽपकुर्युः तस्मात् स्वकीयमेव नगरं गच्छेति नानाशंकाकुला भैमी तस्मिन्।
वने विललापेति भावः करिणां घटना घटा या प्राप्ताऽस्य लाटि घाटीति पदं अवसिति ज्ञाए॰

नै० स्यानलक्ष्माह्वि० वेष्टाप पहीतीणालोटि अलपदिति लपव्यक्तायां वाचीत्यस्य लङि० बहुधा संख्यो
लो० याविधार्थेधा सप्तभिः कुलकम् ५८। श्लो० साविधराधावन्तं रत्नौघं क्वापिनिरपराधावन्तं।
सार्थं राधावन्तं प्रोत्दिष्टापच्च सतन राधावंतं।५०। सा विधुरा धावंतं रत्नौघं क्वापि निरपराधा।
६५ अवन्तं सार्थं राधावन्तं प्रोत्दिष्ट आपत् च सतनुः आधौ अन्तं।५०। सेति विधुरा विरहिता स
65 तनुः शोभनाङ्गी सा दमयन्ती निरपराधाऽपराधरहिता क्वापि कस्मिन्नपि देशे रत्नौघं रत्न
समूहं अवन्तं रक्षन्तं सरत्नसमूहं राधावंतं राधा समृद्धिस्तत् सहितं धावंतं गच्छन्तं सार्थं ज
नसमूहं प्रोत्दिष्ट दृष्टवती आधौ मनः पीडाया अन्तं अवसानञ्च प्रापत्लेभे वेनऽटंतीसार्थं
सासाद्य मनः पीडा जहाविति भावः धावुगतिशुद्ध्योरित्यस्य धावन्तमिति राधसाधसंसिद्धा
वित्यस्य छिड्डिदादिभ्योऽङि त्यङि० राधेति प्रोत्दिष्टेतीक्षदर्शनाङ्कनयोरित्यस्य लङि० आप।
लङि० आपदिति संघसार्थौ तु जन्तुभिः पुस्याधिमानसीव्यथा ५०। श्लो० व्याकुलयेवारितया
विधेर्गतिरनेनसिद्धयेवारितया अपिचययेवारितयायथाशफर्याजलोच्चयेवारितया।५०।
व्याकुलयाइव अरितया विधेः गतिः अनेन सिद्धये अवारितया। अपि च यये वारितया यथा शफर्या। ६५
जलोच्चये वारितया।५१।। टी०।।

टी॰ व्याकुलेति विधे दैवस्यारितया शात्रुत्वे व्याकुलया इव अत्रापि विधाता शात्रुरभूदिति उ
द्भ्रान्त येव तया दमयन्त्या सिद्धये नलान्वेषणा रूपकार्यस्य भीमपुरप्राप्तये वा अनेन सार्थेन
सह गतिं गमनमवाप्य भेजे' हृता वा वारितया का त्वं कुत्र यासि इति निवारितयापि च ययौ।
गतम् कया यथा वारितया वाः जलमितया प्राप्तया सफर्या जलोच्चये जलदृष्टौ यथा ग
नोच्चय इति पाठे जनसङ्घे तया ययौ इत्यर्थः। अवारितया इत्यकार प्रश्लेषे अनिषिद्धयेत्यर्थः।
अवाः जलरहितं निर्जलमितया शफर्येव अहमपि भवत्सङ्गे समीष्यामीत्युक्त्वा निषिद्धया
पि भैम्या गतमिति भावः भागधेयं स्त्री नियतिर्विधिः इत्यमरः भजेस्ताविति तस्य लुङि॰ चिण्भावकर्मणोरिति या।
प्राप्तेण इत्यस्य भावे लिटि ययौ वा वारि सलिलं कमलं जलमित्यमरः अत्रेयं भावार्था
तत्र वने गच्छन्तं वणिक्सार्थं सा ददर्श तान्स्त्र दृष्ट्वा तेषां मध्ये कश्चिन्त शुचिनामा वणिक्
का त्वं कस्यासि क्व यासि इत्याह ततस्तया भीतया सवृत्तान्तं कथितं कुत्रापि भवद्भिर्नलो
दृष्ट इति पृष्टाः न वयं नलं विद्म इत्यूचुः ततः क्व यास्यथ इत्युक्ताः सुबाहुनाम्नश्चेदिराज
स्य देशे वाणिज्यार्थं यास्यामः इत्यूचुः ततस्तैः सार्द्धं सापि ययौ इति ॥५॥ श्लो॰ प्रतिषिद्धा

न॰ न्यायस्य प्राप सुबाहोस्तु राजधान्यायसस्य बहुधनधान्या यस्य प्रवभुर्वृन्दानि बहुविधान्याय
लो॰ स्य ।५२। प्रतिषिद्धान्यायस्य प्राप सुबाहोः च राजधानी आयस्य बहुधनधान्या यस्य प्रवभुः
६६ वृन्दानि बहुविधानि आयस्य ५२। टी॰ प्रतीति आयस्य पदगमनेन आयासं कृत्वा प्रतिषि
66 द्धान्यायस्य प्रतिषिद्धो निराकृतो ऽन्यायो ऽनीति र्येन तादृशस्य सुवाहोः सुवाहुनाम्नो राज्ञः
राजधानी नगरी प्राप च प्रापाय कीदृशी बहुधनधान्या बहुतरं धनधान्यं यस्याः सा य
स्य सुवाहोः आयस्य धनागमस्य बहुविधानि नानाप्रकाराणि वृन्दानि समूहाः प्रवभुः रेजि
रे एवं सार्थेन सह व्रजन्त्या भैम्या आयासेन सुवाहुपुरी प्राप्तेति भावः प्रयेत्यापेलुङि चिणि।
प्रभुरिति भोतेर्लिटि ५२। श्लो॰ सञ्छन्नामात्रासानन्दराज्ञोभृताच नामात्रासा। शोकेनामा
त्रासाववसद्धृतदेहयापनामात्रासा ।५३। सञ्छन्ना मात्रा सानन्दं राज्ञः भृता च नाम अत्रासा।
शोकेन अमा अत्र असौ अवसत् धृतदेहयापनामात्रासा। ५३। टी॰ सञ्छन्नेति असौ दमयन्ती
सञ्छन्ना वपुर्मालिन्यात् दमयन्तीति ज्ञातुमशक्या राज्ञः सुबाहो मात्रा सानन्दं यथा स्यादेवं भृ
ता नाम पोषिता नाम सम्भावनायां अत्र सुवाहुकृतः पुरे अत्रासा त्रासरहिता धृतदेहयाप

मात्रा धृतं देहयापना शरीरस्थितिमात्रं यया सा तादृशी देहधारणार्थं भुंक्ते न तु सौख्या
र्थमिति भावः शोकेन समा शोकसहिता सा भैमी अवसत् वासमकरोत् यद्वा धृता देहनि
र्वाहमात्रं आशा ययेति सा धृतदेहयापनामात्राशेत्येकं पदम् अत्र पक्षे यमके शसयोरभेदो
न दोषाय यमकश्लेषचित्रेषु रलयो र्डलयो र्नभित् नानुस्वारविसर्गौ च चित्रभङ्गाय संमतौ
इतिवत् असौ भैमी सुबाहुमाता दमयन्तीत्यनभिज्ञाय सानन्दमपुषत् सा च शरीररक्षामा
त्राहारा भूदिति भावः अवसदिति वसेर्लङि· अत्रेयं भावमावार्ता सायाह्ने भैमी वणिग्भिः
सार्द्धं सुबाहुनगरं प्राप्ता अथ प्रासादस्था राजमाता तां दृष्ट्वा धात्रीद्वारा स्वसमीपमानी
य का त्वमिति प्रोवाच ततः दमयंत्याः परिचारिकाहमिति भैम्याह राजमातोवाच अ
त्र तिष्ठ ततो भैमी निर्बंधं चकार पादसेवनमुच्छिष्टफेटनं न करिष्यामीति ५३॥
श्लो· पद्या पदा परिभ्रमन्नयेनयापदा पदा। वना वना वनाश्ववत्सजीव ना वनाभ
वत् ५४। पदा पदा परिभ्रमं नयेन या अपत् आपदः। वनावनो अनाथवत् सजी
वना वना अभवत् ५४। टी· पदेति अपदा अत्राणा अस्थाना वा या दमयन्ती

नं॰ लो॰ नं॰ टी॰ ६७ 67

नयेन नीत्वा कृत्वा आपदा विपत्त्या पदा चरणेन वनावनौ वनभूमौ अनाथवत् परिभ्रमं
पर्य्यटं आपत् लेभे सा सञ्जीवनावना जीवनं तस्य अवनं रक्षणं तस्माद्धिता सञ्जीवितर
क्षाभवत् या भैमी विपदि चरणाभ्यां वनभूमौ पर्य्यभ्रमीत् सा जीवरक्षणं प्रापेति
भावः पदंघ्रिश्चरणोऽस्त्रियाम् आपदित्यपि लिङ्गि विपत्त्यां विपदापदौ अवभवदि
ति भवतिर्लङि ॥ ५४ ॥ ॥ इति सुबोधिनीटीकासहिते श्रीकालिदासकृते

नलोदये सत्काव्ये तृतीयोच्छ्वासः ॥ ३ ॥ ऽऽ ॥

श्लो॰। अथ तद्दोपायस्य श्रवणेन नलस्य सानगोपायस्य। वशगा गोपायस्य स्वमनोभी
मश्चिरं जुगोपायस्य। २। अथ तद्दोपायस्य श्रवणेन नलस्य सानुगः अपायस्य। वशगाः
गोपाः यस्य स्वमनः भीमः चिरं जुगोप आयस्य॥२॥ टी॰॥ अथेति अथानन्तरं तद्दोपायस्य
तद्दुः उक्त उपायः सामादि र्यस्य तादृशस्य नलस्य अपायस्यापक्रमणस्य दुःखस्य वा श्रव
णेन सानुगः अनुगच्छन्तीत्यनुगा स्तै सहितः सानुचरः चिरं बहुकालं आयस्य प्रयासं
कृत्वा नलान्वेषणाय भीमः स्वमनः स्वस्य मानसं जुगोप रक्षितवान् यस्य भीमस्य गोपाः।
गां भूमिं पान्तीति गोपाः राजानः ग्रामौघाधिकारिणो वा गोपजातीया वा वशगा आय
न्ताः नलापगमनं श्रुत्वा तदन्वेषणार्थं बहुधा आयस्य शोकसहितं स्वहृत्काथञ्चि
दरक्षन् गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपत्तावपि ग्रामौघाधिकृते पुंसीति मेदिनी।
करः ख्यायकोधिकृतो ग्रामे गोपो ग्रा ग्रामेषु भूरिषु इत्यमरश्च॥२॥ श्लो॰
निशि च दिवाचार्यस्य तनस्पनस ~ लविविचिन्तयेथवाचार्यस्य। भृशमेवाचार्यस्य

नं· द्विजोत्तमैः शिष्यकैरिवाचार्य्यस्य ।२। निशि च दिवा च अर्य्यस्यक्षतस्य नलविचिन्त
लो· ये अथ वाचा आर्य्यस्य । भृशं एव अचारि अस्य द्विजोत्तमैः शिष्यकैः इव आचार्य्यस्य ।२।
६८ टी· निशीति अस्य भीमस्य वाचा वचनेन द्विजोत्तमैः ब्राह्मणश्रेष्ठैः नलविचिन्तये नला
68 न्वेषणाय निशि रात्रौ च दिवा च दिवसे भृशमेव अत्यर्थमेव अचारि नानादेशसञ्चर
णमकारि कीदृशस्य अर्य्यस्यक्षतस्य अरेः अमयः अर्य्यमयस्तैः शत्रुखड्गैरताडितस्य
एवमार्य्यश्रेष्ठस्य आचार्य्यस्य गुरोर्वचसा शिष्यकैरिव शिष्यैरिव स्वार्थे कः शिष्या
यथा गुरोराज्ञयाऽहर्निशं सञ्चरन्ति तथेत्यर्थः ।२। श्लो· अथ नयनेत्रास्यादिप्रचुरा पूः केन
चिज्जनेत्रासादि यत्र स्वनेत्रास्यादिग्भ्रमणाद्दुःखेङ्गतावनेत्रासादि ।३। अथ नयनेत्रा स्या
दिप्रचुरा पूः केनचित् जने अत्र असादि । यत्र स्वनेत्रा सा दिग्भ्रमणेन दुःखे गतावने त्रा
सादि ।३। अथेति अथानन्तरं अत्र जने विषये केनचिदनिर्वचनीयचतुरेण स्वदेवनाम्ना
द्विजेन नयनेत्रा नीतिनिपुणेन स्यादिप्रचुरा स्यादिनोऽश्ववाराः प्रचुरा यस्यां सा
पूः असादि प्राप्ता सा का यत्र पुरि सा स्वनेत्रा भैमी वर्त्तते इति शेषः ६८ २५

कीदृशी सा वने दिग्भ्रमेण दिग्भ्रान्त्या त्रासादि त्रासपूर्वकं दुःखं गता प्राप्ता दिग्भ्रमेण
यत्र आदिक्रान्त्या इतिपाठे यत्र पुरि आदिक्रान्त्या प्रथमप्रवेशेन जने लोके त्रासादि भवति
यत्र पुरि वने दुःखङ्गता सा सैनेत्रा आसीदित्यर्थः ॥३॥ श्लो० सहृद्दीनायतनेन स्वगृहं चैभै
मी ययेयस्तनायतनेन स्वनयेनायतनेन न प्राप्ये स्वासोऽस्त्र शोभमानायतनेन ॥४॥ सहृद्दीना
आयत नेन प्राप्ये स्वासो: च शोभना यतनेन या टी० सहेति दीनादुःखिता भैमी नेन ठि
जेन सह स्वगृहं आयत गतवती चेदिपुरीनिलयं त्रासमेव गृहीता स्ववासस्थाने
गतवती आयततेन धनागमव्यासेन भ्रमता द्विजेन सह भैम्या यये भीमगृहमागती
ति शेषः चेदिराजदत्तधनवता द्विजेन सह भैमी भीमगृहमगादिति भावः यद्वा न
लान्वेषणाय भीमदत्तबहुधनवता विप्रेण भैम्या सह चेदिगृहं यये इत्यर्थः ।
शोभना ना भैमी स्वनयेन स्वनीत्या आयत नेन प्राप्ये
आयः शुभविधिस्तेन नतो आप्तो य इनः स्वामी नल
स्तस्य प्राप्त्यै यतते स्म यत्नमकरोत् ।

न॰ ले॰ ९९ ६१

स्वामोः स्वकीयस्थानस्य प्राप्त्यै न यतते स्म अत्रैवं भ
यं भारतवार्त्ता सुनन्दान्तःपुरे समागते सुदेवे ब्राह्मणे
दृष्ट्वा दमयन्ती रुरोद सुदेव उवाच अहं तव भ्रातुः सखा सुदेव नामा भीमव
चनात् नलमन्वेष्टुमागतः तव बान्धवास्त्वां विना मृता इव तिष्ठन्ति ततो राजमाता
सर्वं वृत्तान्तमकथयत् सुबाहुमाता च नलपत्नी दमयन्ती ज्ञाता आलिङ्ग्य सा तया नेत्र
मास सुनन्दा तु निष्कास्यार्घ्यं तस्या गात्रमलं दूरीकृत्य शिरस्थं चन्द्राकारं रक्तमुला
ञ्छनं ददर्श तच्चिह्नेन सुहृद् ज्ञाता मम भगिन्याः कन्या त्वं इत्युक्त्वा राजमाता नामलं
कृत्वामात्यैः सुदेवेन च सहिता दमयन्ती पितृगेहं प्रापयत् तत्र सा पुत्रादिभिः सह
युयोज भीमश्च सुदेवाय पुनः पुनः प्रणाममकृत्वा बहुधनानि ददौ ततो नलान्वेषणा
र्थं पुनर्ब्राह्मणान् प्रेषयामास इति ।४। श्लो॰ वसनांशस्यार्थेन कासि ममार्यं विधिर्य
स्यार्थेन छन्नविशास्यार्थेन स्वजनेन त्यक्तेन भवसि शास्यर्थे ।५। वसनांशस्य र्धेन कथमसि
मम अयं विधिः यशास्यः तेन छन्नविशसि अर्धेन स्वजनेन भूतेन भवसि शास्यः तेन ५॥ ९९ २८

श्लो॰

सजनेस्तेनागादिक्रामीति जनेन तन्मतेनागादि। भर्तृहृतेनागादिस्पदेन भुवि वस्तुपरि
हृतेनागादि।६। सः जनः तेन अगादिक्रामी इति जनेन तन्मतेन अगादि। भर्तृहृते
नागादिस्पदेन भुवि वस्तुपरिहृतेन अगादि।६। टी॰ सजनेति अगादिक्रामी पर्वतादि
क्रमणशीलः स जनः प्रेष्यजनः भर्तृकृते नलार्थं तन्मतेन भैम्यां जनेन केनचिद्दत्तः
पुरश्चारिणा जनेन इति पूर्वोक्तश्लोकोक्तिप्रकारेणागादि उक्तः तथा च अस्य पूर्वोक्तश्लो
कस्यार्थं ज्ञात्वोत्तरं यो दद्याति तदागत्य कथयेत्युक्तः ततस्तेन जनेन प्रेष्यलोकेन नागा
दिस्पदेन नागं सर्पमत्तीति नागादो गरुडस्तद्वत् स्पदो वेगो यस्य तेन वस्तुपरिहृतेन।
नागरीयवस्तुसंकल्पवता छद्मचारिणा इत्यर्थः भुवि भूमौ अगादि पूर्वोक्तश्लोकस्य को
ऽर्थ इति अवादि स प्रेष्यलोको दमयन्त्यनुमतेन केनाप्युक्तः पुरश्चारिणोक्तः एतदभिज्ञा
ने नलस्येति दमयन्त्यैव ग्राहितसंज्ञः नलान्वेषणाय श्लोकार्थं पृच्छन् पर्य्यचारीदिति
भावः रेहस्तरसौ तु रयः स्पदः शैलहृदौ नगावेगो।६। श्लो॰ कोऽप्यूचे तनयायाः पदमे
स्पल्पयस्यतेपुचेतनयायाः भीमसुचेतनयायाद्दर्शितस्तां दुःसहाचचेतनयायाः।७। कोपि ऊचे।

नं॰ ल॰ ७॰ 70

तनयायाः पदं पत्य त्वंपस्य तेषु च इतनयायाः। भीःमुञ्चेत न यायात् आर्त्तिः तां दुः
सहा च चेतनया या ॥७॥ टी॰ कोप्यूचेइति तेष्वन्वेषकेषु कोप्यन्वेषकजनः इतनया
याः इतः प्राप्तो ज्ञातो वानया यया तादृश्याः ज्ञातनीत त्वंपस्य भीमस्य तनयायाः
पदं स्थानमेत्य उक्तवान् हे दमयन्ति तां भीर्भयं मुञ्चेत् त्यजेत् आर्त्तिः पीडा च न या
यात् न गच्छेत् भयमर्त्तिश्च न भविष्यतीति यावत् या आर्त्तिः चेतनया बुद्ध्या दुःसहा
सोढुमशक्या हे दमयंयति तांभयं पीडां च हास्यति नलो मया लब्ध इत्यवोचदिति
भावः पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु भीतिर्भीः साध्वसमभयं मचल
मोक्षणा इत्यस्यात्मने पदे शेमुचादीनामिति नुमि मुञ्चेतेति रूपम् मति र्मनीषा बुद्धि
र्धी र्धिषणा ज्ञप्तिचेतने इति हेमचन्द्रः आर्त्तिः पीडा धनुः कोट्योरित्यमरः ॥७॥
श्लो॰ निजधामेतं समयामृतपर्णिकाविनतोऽर्थमेतं समया। सचिवसमेतं समया गिरो
त्तरं नाजनि ष्टमेतं समया ।८। निजधामेतं समया ऋतपर्णा आवितः अर्थं एनं सः मया।
सचिवसमेतं समया गिराउत्तरं न अजनिष्ट मेतं समया ।८॥ टी॰ निजेति हे दमयन्ति ७॰

निजधामेतं निजस्थानमयोध्या तेचैतं तत्र स्थितं अयोध्याधीशम् ऋतुपर्णम् ऋतुपर्णना
मानं राजानं समया समागतः सं च । मया एनं अर्थं वमनेत्ले इत्यादिरूपमर्थं वाच्यं समया
